वाचस्पतितृतीयाध्यायप्रथमपादारंभः

Vachaspati tritiya Adhyay Prathama vadarambaha

त॰त्रि १

१

ॐ नमः ॥ तदनंतरस्य प्रतिपत्तौ रहेतिसंपरिष्वक्तः प्रसन्नतिरूपणमंगं ॥ द्वितीयतृतीयाध्याय
योर्हेतुहेतुमद्भावत्वद्वारेणं संबंधं दर्शयन्स्वरूपावबोधार्थमर्थसंक्षेपमाह द्वितीय
ध्याय इति ॥ स्मृतिन्यायश्रुतिविरोधपरिहारेण हि सम्यग्दर्शनमवसायत्वदोषेण मसामा
ण्यं परिहृतं ॥ तथा च साभासानि निरस्तानीतरेतराणीयो विचारो भवत्यन्यथानुत्पत्ति
वीजत्वमानमस्ति ध्येदिति ॥ अवतोत्तरसंगतिं दर्शयितुं तत्र च जीवव्युत्पतिरिक्तोति
तत्वाति जीवो प्रकरणानि चेत्युक्तं ॥ अध्यायार्थसंक्षेपमुक्त्वा पादार्थसंक्षेपमा
ह तत्र प्रथमे तावत्पाद इति ॥ तस्य प्रयोजनमाह वैराग्येति ॥ पूर्वापरपरिशो
धनाय भूमिकामारचयति जीवो मुख्यप्राणसचिव इति ॥ करणोपादानव
त्त्वतो पादानतस्यानुक्ततत्वादिति ॥ अत्र च करणोपादानस्य त्वेव मोति कर्तव्यत्वा
रणं तो वक्ते तोपादानमस्ति देहदृष्टिपोपादनातिरिक्तमात्रविवक्षया ध्रुवकरणांश्च ॥ य
द्विभूतानुपादायागमिष्यन्तेदपि करणोपादानवदेवास्योक्ष्यत न च श्रूयते तस्मा

ते भूतपरिशिष्टत्वो रंहत्वापितुकारणत्वाच्च परिशिष्टत्वः॥ नह्यागमैकगम्येर्थे तदभावः प्रमेयाभा
वेन परिहर्तुमर्हति॥ न चेदेहांतरारंभोन्यथानुपपत्त्या भूतपरिशिष्टत्वस्य रंहएकत्वने
तियुक्तमित्याह सत्यं भाष्य सर्वत्र भूतमात्रा इति॥ धुपर्जन्येति॥ देहाहिकायारंभणम
ग्निहोत्रापूर्वपरिणामत्वं श्रद्धादित्वेन पंचधा प्रविभज्य पंचसु द्युप्रभृतिषु अग्नि
षु होतव्यत्वेनोपासनं मुक्तरमार्गप्रतिपत्तिसाधनं विवक्षुरित्याह श्रुतिः असौ वाव लोको गौ
तमाग्निरित्यादिः॥ [illegible]न सायं प्रातरग्निहोत्राहुती हुते पयआदिसाधने श्रद्धा प्रवे
आहवनीयाग्नि समिद्धूमार्चिरंगारविस्फुलिंगभाविते कर्त्रादिकारकभाविते वांतरिक्षे
कर्मणे अमुं द्युलोकं प्रविशतौ सूक्ष्मभूते द्रवद्रव्ये पयः प्रभृत्यप्संबंधादप्शब्दवाच्ये
श्रद्धाहेतुकत्वाच्च श्रद्धाशब्दवाच्ये तयोराहुत्योरधिकरणमग्निरन्यो च समिद्धूमार्चिरंगा
रविस्फुलिंगाः रूपकत्वेन निर्दिश्यंते॥ असौ वाव द्युलोको गौतमाग्निः॥ यथाग्निहोत्रा
धिकरणमाहवनीय एवं श्रद्धाशब्दवाच्याग्निहोत्राहुतिपरिणामावस्था रूपाः सूक्ष्मा

छां० उ० १
२

याग्नायः अग्न्युद्भाविता॥ तद्दृष्टिकरणं द्युलोकः अस्यादित्य एव समित्। तेन हीद्धो सौ द्युलोको
दीप्यतेऽतः समिंधनात्समित् तस्यादित्यस्य रश्मयो धूमाः इंधनादादित्यात् रश्मीनां
समुत्थानात् अहरर्चिः प्रकाशसामान्यात्॥ आदित्यकार्यत्वाच्च॥ चंद्रमा अंगाराः अर्चिषः
प्रशमेऽभिव्यक्तेः॥ नक्षत्राण्यस्य विस्फुलिंगाः चंद्रमसोऽङ्गारस्यावयवा इव विप्रकीर्णत्व
सामान्याद्विस्फुलिंगाः तस्मिन्नेतस्मिन्नग्नौ देवा यजमानप्राणा अग्न्यादिरूपा अधिदैवे
श्रद्धां जुहुति [illegible]॥ पर्जन्यो वाव गौतमाग्निः [redacted]
पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवताविशेषः तस्य वायुरेव समित् वायुना हि प
र्जन्योऽग्निः समिध्यते पुरोवातादिप्राबल्ये वृष्टिदर्शनात्॥ अभ्रं धूमः धूमकार्यत्वात्
धूमसादृश्याच्च॥ विद्युदर्चिः प्रकाशसामान्यात्॥ अशनिरंगाराः काठिन्याद्विद्युत्संबं
धाच्च॥ गर्जितमेघानां विस्फुलिंगाः विप्रकीर्णतासामान्यात् तस्मिन्देवा यजमानप्राणा
अग्न्यादिरूपाः सोमं राजानं जुहुति तस्याः सोमस्याहुतेर्वर्षं भवति॥ एतदुक्तं भवति॥ अपां

रव्या। आपो द्युलोकमाहुतित्वेन प्रविश्य चंद्राकारेण परिणताः सत्यः द्वितीये पर्जन्याग्नौ
हुता वृष्टित्वेन परिणमंत इति॥ पृथिवी वाव गौतमाग्निः तस्य पृथिव्याख्यस्याग्नेः संवत्सर
एव समित्संवत्सरेण कालेन हि समिद्धा भूमिर्व्रीह्यादिनिष्पत्तये कल्पते आकाशो धूमः
पृथिव्याग्नेरुत्थित इवाकाशो दृश्यते रात्रिरर्चिः पृथिव्याः श्यामाया अनुरूपा श्यामतया रात्रिरग्ने
रिवानुरूपमर्चिः दिशोंगाराः अग्ने रात्रिरूपार्चिः शमने उपशांततानो प्रसंगान्नानां दिशां दर्शना
त्॥ अवांतरदिशो विस्फुलिंगाः क्षुद्रत्वसाम्यात् तस्मिन्नग्नौ अब्सोम परिणामक्रमेणगता
आपो वृष्टिरूपेण परिणता देवानुहुति॥ तस्या आहुतेरन्नं व्रीहियवादि भवति॥ पुरुषो वाव गौ
तमाग्निः तस्य वागेव समित् वाचा खल्वयं तालुकाद्युपस्थानस्थित पावर्ण प देवाकाशाभिव्यक्तिक्रमे
ण पिजातं प्रकाशयन्नस्मि ध्यते॥ प्राणो धूमः धूमवन्मुखान्निर्गमात् जिह्वार्चिः लोहितत्वसाम्या
त् चक्षुरंगाराः प्रभाश्रयत्वात् श्रोत्रं विस्फुलिंगाः विप्रकीर्णत्वात्॥ तास्वेवापः श्रद्धादिपरिणामक्र
मेणागताः व्रीह्यादिरूपपरिणताः सत्यः पुरुषेग्नौ हुतास्तासां परिणामो रेतः संभवति॥ योषा वाव

वा॰त्रि॰१
६

गौतमाग्निः तस्या उपस्थ एव समित् ॥ तेन हि सा पुत्राद्युत्पादयैनाय समिध्यते यदुपमंत्रय
ते स धूमः स्त्रीसंभवादुपमंत्रणस्य लोमानि वा धूमः ततः समुत्थानात् योनिरर्चिर्लोहि
तत्वात् यदंतः करोति मैथुनं ते अंगाराः अभिनंदाः क्षुद्रसुखलवा वा विस्फुलिंगाः क्षुद्रत्वात् तस्मिन्ने
तस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः संभवति ॥ एवं श्रद्धासोमवर्षान्नरेतोहव
नक्रमेण योषाग्निं प्राप्य योगर्भीरूपा भवंति ॥ तत्रापामवाधिक्यात् आपः पुरुषवचसो भ
वंति पंचम्यामाहुतावितिपतः पंचम्यामाहुतावापः पुरुषवचसो भवंति तस्माद्देहः परिवेष्टि
तो जीवो रंहति स्त्रियां भ्यते ॥ एतदुक्तं भवति ॥ अभ्यतादवाच्या आप इत्यग्रे वक्ष्यति । तासां त्रिवृ
त्कृतत्वात् तेजोऽन्नाविनाभावेनाप्यसहगतेन तेजोऽन्नयोरपि संग्रह इत्येतदपि वक्ष्यते ॥ यद्यपि
तावतापि भूतवेष्टितस्य जीवस्य रंहणं नावगम्यते तेजोबन्नानां पंचम्यामाहुतौ पुरुषवच
स्त्वमाचक्षवरणात् ॥ तथापि श्रोत्रादिकारिणां धर्मादिनापि तत्पाणेन यथा चेह लोके मातिकर्यन
परयोगमाकाशाच्चेंद्रमसं मेघसोमो राजेति श्रुत्या सह श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सं

भवतीत्यस्याः श्रुतेः कस्मान्न तावदेवमुच्यते भवतु परिग्रहीतो रंहतीति ॥ तथाहि याएवापो हुताहुतीयस्यामाहु
तौ सोमभावं गताः ताभिरेव परिग्रहीतो जीव इत्यादिकारी चेद्धमर्यत्तत्संक्रद्दूलोके प्राप्तइति ॥ ननु स्व
तंत्रा आपः श्रद्धादिक्रमेण सोमभावमनुभवंतु ताभिरपरिग्रहीता एव तु जीवः सैद्ध्यमाजोगत्वा सो
मभावमनुभवतु को दोषः ॥ अयं दोषः यतः श्रुतिसामान्यातिक्रमः स्यात् एवं हि श्रुतिसामान्यं कल्पे
त यदि येन क्रमेणापो येन च क्रमेण तासां सोमभावः तेनैव जीवस्यापि सोमभावो भवेत् अन्यथा तु
न श्रुतिसामान्यं स्यात् तस्मात् परिग्रहीतो परिग्रहीत्वा रंहत्यविशेषे श्रुतिसामान्यानुरोधेन परिग्र
हीतो रंहतीति निश्चीयते ॥ श्रुतेश्चादिपयः प्रभृतयो द्रवभूयस्त्वादापो हुताः स्त्रीतत्तीभूता इत्यादिक्रमा
दिलोकाश्रिताः नैव नैव विधिना देहे हूयमाना हुताः सत्यः श्रुतिमयमिच्छादिकादिरूपपरिवे
ष्ट्य स्वर्गलोकं नयंतीति ॥ चोदयति नन्वन्याः श्रुतिरिति ॥ अयमर्थः ॥ एवं हि तत्त्वमदेहपरिग्र
हीतो रंहेद्यद्यस्य स्थूलशरीरं रंहतो न भवेत् आजितस्य वर्तमानस्थूलशरीरयोगः आदेहां
तरप्राप्तेः त्वरगं जलात् पुष्कानि दर्शनेन तस्मान्निरशी न श्रुतिविरोधात् तत्त्वमदेहपरिग्रहीतो रंह

वा॰त्रि॰ ८

तीति॥ परिहरति तत्रापीति॥ नतावत्परमात्मनः संसरणं संभवः तस्य नित्यशुद्धबुद्धमुक्तस्व
भावत्वात् किंतु जीवानां परमात्मनो औपाधिकल्पितावच्छेदेन जीवद्भूतारत्म्यपते॥ तस्य च देहेंद्रिया
देरूपाधेः आदेशिकत्वात् न तत्रस्थस्य देहांतरं गंतुमर्हति तस्मात् सूक्ष्मदेहपरिछिन्नो लोकांतरं गंतुमर्हति॥
केर्मोपस्थापितः प्रतिपत्तव्यः मानसयो योऽदेहे तस्य हृदि याधा भावनायाः उत्पादनायादीर्घी भावना
त्रेऽङ्गुलकेपोपमीयते॥ मंडलव्यापिनो कल्पनामाह व्यापिनोकरणानामिति॥ आहंकारिकत्वात्करण
नां अहंकारस्य च जगन्मंडलव्यापित्वात् करणानामपि व्यापित्वे सर्वेः। योधीनां कल्पनामाह के
वलस्यैव चात्मन इति॥ श्रीलपाविज्ञानसंतानरूपात्मात् तस्य हृत्तिः षट्समवृत्तिविज्ञानानि पंचे
याणितु वेदेहद्ये न्याभिनवानि जायंते॥ क्षणभंगुरकल्पनामाह मनएवेति॥ मोगस्याने मोगाय
तनं शरीरमाभिनवमिति यावत्॥ दिगंबरकल्पनामाह जीवएवोत्प्लुतेति॥ आदिगृहारे नलोकायति
कानां कल्पनां संगृह्णाति तेहि शरीरात्मवादिनो भस्मीभावमात्मनः आहुनं दुःखाद्वे उमननमिति
चोदयति ननु सहतां भोगमिति॥ अत्र सूत्रेणोत्तरमाह आत्मकत्वोनुभयम्न्यात्॥ तेनस्तः कार्य

मशितपीताहारपरिपाकः अपां कार्यं स्निग्धत्वादि ॥ पृथिव्याः कार्यं गन्धादि ॥ यस्तु गन्धस्वेदपा
कप्राणनवकाशदानादेहस्य पञ्चभौतिकत्वपरं तेजोबलात्मकत्वेन आत्मकत्वेन परितुष्य
तिं प्रत्याह पुनश्च आत्मक इति ॥ वातपित्तश्लेष्माणः त्रिभिर्धातुभिः शरीरधारणात्मकैः त्रिधा
तुत्वात् ॥ अतो न सो देहो भूतोत्तराणि प्रत्यारब्धा एकैकवलाभिर द्विरारब्धुं शक्यते ॥ अथ ग्रह
णान्नियमस्तर्हि किं स्यादित्याशङ्क्याह तस्मादुन्नयस्त्वापेक्षेति ॥ पृथिवीधातुवर्जमितरतेजआ
पपेक्षया का यस्य शरीरस्य लोहितादिद्रव भयस्त्वानलकारणपोआपादानैमित्तयोर्द्रव मे नि
यस्त्वात् अपां पुरस्य बन्धत्वालिः ॥ नपुनः भूतोत्तरनिराशापी ॥ प्राणागते स्थ ॥ प्राणलोजी
वदेहे सा अयत्वमवगन्तेगच्छति जीवदेहे तदनुविधायिनः प्राणाश्चापि गच्छन्तीति देहमतः प्रा
कौशिका देहादुक्ताः अंततः कौशिका अपि देहा उक्ता मत्पुक्ता मंति मचैवामनुविधेयः सत्वस्य देहो मतं द्वि
यमयद्गतिगमाते ॥ नहीन्द्रियमात्रा अयत्वमेषां देहं यतस्तन्मात्रा अप्राणांगतिरूपपद्यते इति ॥
अगन्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ भावितेपि स्वप्नेजीवस्य प्राणैः सह गमने श्रूयता

बा·त्रि·१
५

दिगतिशंकाशंकातिविरोधोत्थापनार्था॥ अत्र हि लोके वेदे शमोकौषधिवनस्पतिगमनेन्द्रशविरो
धाग्नीके तावद्रश्मुपेपं॥ एवं चतत्क्ष्यपतितत्वेन तेषामपि अतिविरोधात्माक्कात्वमेवोचित
मिति मंत्रिश्लोपकारनिवृत्तिरुक्ता॥ प्रथमेऽध्याये ब्रह्मादितिचेन्नताएवम्पपपत्ते:॥ पंचम्या मा
हुतावपोपुरुषवचसत्प्रकारेष्वेषु प्रथमसापापमाहुतौ अनपोश्रद्धामाहोतव्यताभिधानम
संबंधं॥ अनुपपन्नं चैतन्न हि पयापम्बादिमोहद्रव्यादपोवपवश्रवदायतिःसप्ष्टहूपेतेः॥ एवं
श्रद्धा बुद्धिप्रसादलक्षणा निष्कृष्ट्वा होतुं वा शक्यते॥ नचाप्येवमौत्सर्गिकीकारणानुरूप
ताकार्यस्याप्युपपद्यते तस्मादुत्पायमप्सु श्रद्धाशब्दः प्रयुक्तइति॥ अत एव श्रुतिरापोहेति॥ अश्र
तत्वादितिचेन्नेष्टादिकारिणांप्रतीतेः॥ अस्यार्थः॥ पूर्वमेवोक्तः॥ अग्निहोत्रे षट्सु संख्यातिग
तिप्रतिष्ठालतितृप्तिनकावृत्तिलोकं प्रत्युत्थायिविषयिनिरूपणिसमिद्धूमार्चिरंगारविस्फुलिंगेषु प्रश्नाः षट्
तेषां यः समाहारः षट्कं सा षट्प्रश्नीतस्याः निरूपणं प्रतिवचनं॥ तत्र अंतरमवतारयन्ति
तं शंकते वापेउ नरिति॥ को मे राजान मायाप्यापम्बाप्रतीयस्वेति॥ एवमनेनासत्रमदर्शयंतीति

क्रियासमभिहारेणाप्यायनापदृष्टौयथासोमस्य॥तथामहयंतिमोसमपालोकानितितात्पर्यः॥अ
तउत्तरंपठति॥आकंवानात्मवित्वान्तपाहिदर्शयति॥कर्मजनितफलोपभोगस्यतोषधिकारीन
पुनरूपभोगस्यस्याचंद्रस्यालोकस्मरूपमितानांरेवादिमहस्तत्वेकर्गकामोपजेतेतियोगमा
वनायाःकर्त्रीपेक्षितोपापातारूपविधिश्रुतिविरोधाद्नात्मवेद्योमोनुक्रमेणमेवसंतोदेवोपजीविताम
त्रेणभाक्तोगमयितव्योननुचर्वणमिजरणमंसमुरव्यइतिग्रंथेवापेक्षितांतरंसंगच्छतइत्या
हतपाहिदर्शयतिश्रुतिरनात्मविदामनात्मवित्वाद्देवपशुत्वंदेवोपभोग्यतानतुचर्वणमपत
पातपाहिबलीवर्द्दोयोभुंजानानात्मविसंपालेस्वामिनोहलादिवहनेनोपकुर्वाणभोग्याः
एवंपरमात्मतत्वमविद्वांसइंद्रादिकादिणइहरविपयःपुरोडाशादिनाश्रमुष्मिंल्लोके
परिचारकतयादेवानामुपभोग्याइतिश्रुतात्पर्यः॥अपरोयमनात्मवित्वान्तपाहिदर्शयति
इतउस्याप्याचारभ्याज्ञात्मवित्वंचाग्निविषयंविविक्तनम्रात्मवितश्रुनात्मवित्वं॥योहि
पंचाग्निविद्योनवेदतेदेवानम्नयंतीतिनिंद्यतेपंचाग्निविद्यांरस्तोतुंतस्याएवमकृतत्वात्॥

वा॰त्रि॰१
६

तस्तेनोपचारस्यप्रयोजनमुक्तं॥उपचारनिमित्तमनुपपत्तिमात्रंतथाहिदर्शयतिश्रुति
र्भौतिकत्वे॥ससोमलोकेविभूतिमनुभूयेतिशेषमात्रेणेहतावर्तं॥कृतात्ययेनुशयवा
न्दृष्टस्मृतिभ्यांयथेतमनेवंच॥यावत्संपातमुषित्वेतियावदुपभोगवचनात्यत्किंचेह
करोत्ययमितिचयत्किंचेहकर्मकृतंतेनतस्यांतेप्राप्येतिश्रवणात्॥प्रायणस्यचैकप्रघ
ट्टकेनसकलकर्माभिव्यंजकत्वात्नखल्वभिव्यक्तेनिमित्तस्यसाधारणेकाभिव्य
क्तिनियमोयुक्तः फलेदानाभिमुखीकरणंचाभिव्यक्तिः॥तस्मात्समस्तस्यैवकर्म
फलमुपभोगोजीवतस्यफलविरोधिचकर्मतस्मात्अतोरयपपत्तेप्रातिरनुशयानामे
वचरणात्॥आचारादेवरोहीनंकर्मणः आचारकर्मणीतत्कृतेः प्रसिद्धमेदेयथाका
रीयथाचारीतथाभवतीति॥तथाचरमणीयचरणाः कपूयचरणाइत्याचारमेवयोनि
निमित्तमुपदिशति॥नतुकर्मतोवाकर्मशीलेहेतुप्रविशेषेणानुशयः तथापियथ
थयान्निष्टापूर्तकारीस्वयंनिरनुशयोमुक्तभोगत्वात्तथापिपित्रादिकानुशयवशा

तद्धि पाकानुगतात्पुण्यभोगान्न चेद्दुःखलोकादवरोहोनुभविष्यति स्मर्यते हि नस्य स्वकृतदुःखं तत्काम्य
मनुष्यस्य तत्संबंधिनः तत्फलभोगितापत्त्यर्थं शरीरेण पस्वभावीस्तत् यंपि वेदिस्वादिना
तपास्नानुवैश्वानरीयेस्वादेः पिशाचादिगामिफलश्रुतिः तस्मादापवत्सोपात्तमित्यु
पक्रमान्तेध्यानपतितं चेह कर्मेतीति चेत्कल्पेतरानुशाराद्रमणीयचरणत्वेसंबंध्यंतर
गतमित्यपरं ततोरित्यिभाक्तंगन्मयितव्यंतपाचनिरनुशयानामेवमुक्तोभोगान्नाम
रोहइति प्राप्तमुच्यते ये न कर्मकलापेन फलमुपभोजितं ततोवन्तीते चिमानुशया
एवचेद्रमंडलादवरोहंति॥ कुतः इष्टस्यादितिगोप्रत्यक्तदर्शनश्रुतिः इष्टादेवान्ना
स्मृतिसुपपन्नता॥ अपवादक्षदं द्वेनो ज्ञावचनं यो भोगरुच्यते॥ प्रमाण्यसंप्रसिद्धिः॥ क
प्रपचनमनीयचरणात्इत्यवरोहतामेतद्धि श्रवणं नेच्छमितिमुख्यार्थसंभवेसं
बंधिमात्रेलक्षणया चरितार्थत्वेन्याय्यं नचोपक्रमविरोधात्स्कात्वे तर विरोधाच्च मुख्यापी
संभवइति सांप्रतं॥ इत्तफलेशप्रतीकर्मापेक्षया विपाकस्य इत्यपर्याप्तिं चेति पदस्य चोपश्लेः॥

या॰ त्रि॰ ११
८

नहि यावज्जीवमग्निहोत्रं जुहुयादिति यावज्जीवमाहारविहारादिकमनेनापि होमविधिनानापि
मध्याह्नादावपि तु सायंप्रातः कालापेक्षया ॥ सायंप्रातः कालविधानसामर्थ्यात्कालस्य
चानुपादेयत्वात् अंगस्यापि निमित्तानुप्रवेशात्तत्रैवमिति चेत् नेहापि रमणीयच
रणाद्रूत्वादेर्मुख्यार्थत्वानुरोधात्तदुपपत्तेः ॥ तन्निमित्तानामुपसंहारानुरोधेनोप
क्रमः संकोचयितव्यः नेत्युच्यते नह्युपसंहारानुरोधेनोपक्रमसंकुचद्वृत्तिरुप
पत्तुमर्हतीति नहि यावतः संपातानावता वा तु सोमसंपातान्सर्वे तत्रेत्यादि कास्मिन्प्रयोगेन
ह्ययं नोपैते ॥ पुरुषान्तराश्रयाणां कर्मशेषाणां तद्योगेन द्रव्यमेति संसर्गात् ॥ विरोप
मुक्तानां च कर्मशेषाणां न समस्तानां चंद्रमं उल्लोपभोगेनानपगतपनात् ॥ नपाच
स्वपं संजुचंती यावत्सर्वमिति रूपसंहारानुरोधप्राप्तमपि संकोचमनुमन्यते ॥ एते
न पलिं चेह करोतीत्यपि व्याख्यातं ॥ अपि चेष्टापूर्तकारीह जन्मनि केवलं न नतन्नो
त्रमकार्थीते अपि तु गोदोहनेनापः प्रणयन्पशुफलमप्यपूर्वसमवेषीहैव म

नादृष्टिसानीरवास्न नेत्रश्राभिः पुण्यापुण्यसमिहामुत्रोपभोग्यं संचितवंतो न सर्व्वो हि लोकादि भोग्यं
चंद्रलोकोपभोग्यं भवितुमर्हति॥ न च स्वफलविशेषविनोनुशयस्य रूते प्रायश्चित्ताद्वा आज्ञा
नाद्दृष्टफलस्य ध्वंसः संभवति। तस्माज्जैनानुशयवतामपरावर्त्तंत इति सिद्धं। न चैकभ
विकः कर्माशयस्त्वेभाष्यकृद्दूषणति॥ अन्येतु सकलकर्म्मक्षये परावृत्तिरंशकानिर्वी
ज्ञेति मन्यमाना अन्यथाधिकरणं वर्णयांबभूवुरिति आलंकेचित्तावदाहुरिति॥ अनुशयो
बद्दत्तफलस्य कर्मणः शेष उच्यते तत्रेदमिह विचार्य्यते किं दत्तफलानामिष्टादिकर्म
णामवशेषादिहावर्त्तंते उत तान्युपभोगेन निरवशेषं क्षपयित्वाऽनुपभुक्तफलकर्म
वशादिहावर्त्तंत इति तत्रेष्टादीनामुपभोगेन सम्यक् क्षपितत्वान्निरनुशया एवापरानु
भुक्तकर्मवशादावर्त्तंत इति प्राप्त उच्यते सानुशया आवर्त्तंत इति कुतः दृष्टानुसारात॥
यथा भांडस्थं मधुनिःक्षिप्य पिबा क्षालितेऽपि भांडलेपवत्तच्छेषं सर्पिर्वा मधु वा न क्षाल
यितुं शक्यमिति दृष्टं॥ एवं तदनुसारादेतदपि द्रष्टव्यं॥ न चावशेषमात्राच्चेद्भंडलेनिष्ठा

वा. २१
८

सन्नेपि स्यान्तु पारपतिं ॥ यथा सेवको हाक्तिकाख्यीयप्रतिव्रातपरिचरतो महाराजं सेवमानः
कालवशाच्छत्रपादुकावशेषो न सेवितुमर्हतीति ॥ शंतन्त्रालाचलेभ्यो किं ती स्मरति गिति ॥ एष स्व
तिमीमांसानुशयालवावर्जन्त इति तदेतद्दूषयति नत्वेतदिति । एवकारे प्रयोक्तव्य इवकारो गु
उत्तिष्ठितया प्रयुक्तः ॥ श्रादेवकगम्योऽर्थो न सामान्यतो दृष्टानुमानादवस्थर इत्यर्थः ॥ शेषम
तिरोहितार्थः सर्वमृत्तेहेतुमनुमाय तो यदस्यपुक्तेजाश्राणमिति ॥ दूषयति तदस्यानुशयम
प्लवेति दमरणीयचरणाः कपूयचरणा इत्यादिश्रुत्यानुशयप्रतिपादनपरया श्रुत्यावि
रुद्धं इत्यर्थः ॥ अपि चेत्यादि ॥ इह जन्मनि हि यथा योपरणस्सुखदुःखे व्यज्यमाने दृष्यते यु
गपद्वेदक प्रयद्दकेन प्रापरणेन सुखदुःखफलानि निबद्धारन्न ॥ पुण्यपदेवतता लानिमं
ज्येरन् ॥ तस्मादुपभोग्यपर्याप्रदर्शनात् कल्पयता दुःखेलस्याभिभवः कल्पनीयः ॥ एवं विरु
द्धजातिनिमित्तोपभोगफलेष्वपि कर्मसु द्रष्टव्यं ॥ न चाभिव्यञ्जकं च फलेन दृश्ते इति च सं
भवति ॥ फलोपजननाभिमुखं हि कर्मणामभिव्यक्तिः ॥ अपि च प्रायणस्याभिव्यंजक

त्वेकस्वर्गे नरकादितिर्यग्रूपो निर्गतानां जंतूनां तान्नियमो निषिद्धकारादिः॥ ना पूर्वकर्म
प्रजनः पूर्वकृतस्य कर्माशयस्य प्रयाणागमने न तया फलोपभोगेन प्रहतया न्याज्जितो वा न
श्रीशय इति। न ते संसारे पुनश्च मुच्येरन्नात्मज्ञानाभावादिति तद्देवत विस्तारस्य॥ न च स्वक
मवेत मेव प्रयाणेनाभिव्यज्यते। पूर्वं न परस्मै समवेतं येन पित्रादिगतेन कर्मणा काव्येनेर
न्निति॥ शेषेतुशब्दः॥ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः॥ अनेन निरनुशय
एवावरोहतीति पूर्वपक्षबीजं निगूढमुद्घाट्य निरस्यते यथाप्यप्रयोधः सर्वमेते पुण्यकर्मा ग्रन
मागिरा॥ अनुग्रहश्च ज्ञानं च शीलमेतद्धि दुर्बुधा इति स्मृतेः॥ शीलमाचारो नुशयाद्भिन्नः त
ण्यस्यानुशयो न तथा ऽनुशयोपलक्षणत्वेन कार्ष्णाजिनिराचार्यो मेने। तथा च रमणीयचरणाः॥
कपूयचरणा इत्यनेनानुशयोपलक्षणान्नित्यं सानुशयानामेवावरोहणमिति॥ आनर्थक्य
मिति चेन्न तदपेक्षत्वात्॥ आचारहीनं न पुनंति वेदा इति हि स्मृत्या वेदप्रदेन वेदार्थसुपल
क्षयं त्या वेदार्थानुष्ठाने पिलमाचारस्योक्तेः॥ ननु स्वतंत्र आचारः फलस्य साधनं तेन वेद

वा. त्रि. पीनुष्ठानोपकारकत्वमाचारस्यनानर्थक्यं ज्ञेत्वर्थस्मात् तदनेन समिदादिवदाचारस्यक्रत्वर्थत्व
८ मुक्तं संप्रतिस्नानादिवत्पुरुषार्थत्वे पुरुषसंस्कारकत्वेऽप्यदोषइत्याह पुरुषार्थत्वेप्याचार
स्येति॥ तदेवं चरणशब्देनाचारवाचिनासर्वोनुशयोपलक्षितइत्युक्तं॥ बादरिस्तु मुख्य एव
चरणशब्दः कर्मणीत्याह॥ सुकृतदुष्कृते एवेति तु बादरिः॥ ब्राह्मणपरिव्राजकन्यायेनो
क्तोवृद्धन्यायः॥ शेषमतिरोहितार्थं॥ अनिष्टादिकारिणामपि च श्रुतम्॥ ये वै केऽ
चास्माल्लोकात्प्रयंति चन्द्रमसमेव ते गच्छंतीति कौषीतकिनां समाम्नातत्वाद्देहारंभस्य च
चंद्रलोकगमनमंतरेणानुपपत्तेः पंचम्यामाहुतावित्याहुतिसंख्यानियमा
त्॥ तथाहि पुंसामश्रद्धान्तरेतःपरिणामक्रमेणलिंगरापोयोषिदग्नौहु
ताः पुरुषवचसो भवंतीति अविशेषेण श्रुतं॥ न चैतन्मनुष्याभिप्रायं॥
कपूयचरणाः श्वयोनिमिता मनुष्येपि श्रवणात्॥ गमनागमनाय च देवया
नपितृयाणयोरेव मार्ग योराम्नातात्तेषां तरस्याश्रुतेः॥ जायस्व

त्रियस्त्वेति तत्तीयं स्थानमिति चस्थानत्वमात्रेणावगमात्तपर्यितवेनाप्रतीतेः॥ चंद्रलोकार
वेतीर्लोकामपि च तत्स्थानत्वसंभवात् संदृश्येन प्रतिवचनोपपत्तेः॥ अनन्यमार्गगतया च तद्भोगविरहिणाम
पिग्रामं गच्छन्त्वादमस्त्वानुपसर्पतीति वक्तुं यमनादिषु यमवश्यतायै चंद्रलोकगमनोपपत्तेः॥ नक
तरेण च नेत्यस्मात्संपरस्य प्रतिपादनपरतया मार्गद्वयनिषेधपरत्वाभावादनिष्टादिकारिणामपि चंद्रलो
कगमने प्राप्तेऽभिधीयते॥ स तत्संस्थानतयाऽवगतस्य न मार्गत्वं तथापि वित्यपयासेऽलोको न संप्रपूर्य मार्गो
तइत्यस्य प्रतिवचनावसरे मार्गद्वयनिषेधपूर्वं तृतीयं स्थानमभवदन्नंसे प्रदर्श्यत इति
पद्मोमाचक्षीत यदि पुनर्विक्ते नैवमार्गेण गत्यजन्मसरणप्रबंधवत्स्थानमध्यासीत नैतत्तृतीयम
वेऽलोकी ह्यादिकारिणां चंद्रमंडलादवरोहसमस्त्रीयोनिं दितोवापोनं प्रतिपद्यमानात्तृतीयस्थाने प्रतिप
न्नतत्वस्य हेतोः॥ तयानेन यथावरोधात्तयदि हि द्रजंतवोव्यनेनैव यथावरोहयुः नैतदेवोज
न्मसरणप्रबंधवत्तृतीयं स्थानेऽभवेत्तेनावगम्यतेः॥ संयमने च सप्तयातनाऽनुभूय सन्वरत
या प्रतिपद्यमानानामनिष्टादिकारिणां न चंद्रमंडलादवरोहंतीति तस्मात् स एवं के चेतीष्टादिकारिविषयंन

वा॰त्रि॰१
१॰

सर्वविषयं॥ पंचम्यामाहुतावितिच स्वार्थविधानपरं न पुनरपं चम्याहुतिप्रतिषेधपरं सपिंडास्य भेदप्र
संगात्संयमनेनत्वनुभूयेतिसूत्रेण वरोहापादानतयाकं यमनस्योपादाना ज्जेद्र मंडलेत्नापा
दानविषेधश्चोक्तस्तः॥ तथाच सिद्धं तस्य तत्रमेव द्वर्वपक्षमत्रेत्वेतुशेकांतनाध्याहारेण कथं चित्त
नमपितर्कं॥ जीवजेजनायुजे संश्लोकजेस्वेदजे॥ साभाव्यापत्तिरुपपत्तेः॥ यद्यपि पयेतमा
काशमाकाशाद्वायुमित्यतो न तादात्म्यं स्फुटमवगम्यते तथापि वायुभूतो त्वेत्वात् देः स्फुटत
रतादात्म्यावगमात् पयेतमाकाशमित्येतदपि तादात्म्यएवावतिष्ठते न चान्यस्यान्यभावा
नुपपत्तिः॥ मनुष्यशरीरस्य नंदिकेश्वरस्य देवदेहरूपपरिणामस्मरणात् देवदेहस्यच नहु
षस्यतिर्यक्त्वस्मरणात् तस्मान्मुख्यार्थ परित्यागे न नगौणीवृत्तिराश्रयणीया गौणप्रावृत्तौ
लक्षणाशब्दः प्रयुक्तः गुणैर्लक्षणायाः संभवात्॥ यथाहुः॥ लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा
तु गौणतेति॥ वंशस्तेस्तुम्सः॥ साभाव्यापत्तिः॥ समानो भावो रूपं येषां ते सभावास्तेषां
भावः साभाव्यं सारूप्यं साद्दृश्यमितियावत्॥ कुतः [redacted] उपपत्तेः [redacted]

॥ एतदेव व्यतिरेकमुखेन व्याचष्टे न चान्यस्यान्यभाव उपपद्यते ॥ युक्तमेतद्यद्देवशरीरमजगरभा
वेन परिणमते देवदेहस्य समये ऽजगरशरीरस्याभावात् ॥ यदि तु देवाजगरशरीरे समकसमयमे
व स्यातां न देवशरीरमजगरशरीरं शक्तिमिशते नापि क्रियते ॥ न हि दधिपयसी समकसमये प
रस्परात्मनि शक्येते पादयितुं तथेहापि स्वस्वशरीराकाशयोर्युगपद्भावान्न परस्परात्म
त्वं भवितुमर्हतीति ॥ एवं वा श्वादिष्वपि योज्यं ॥ तथा च तद्भावस्तत्सादृश्ये नोपचारिको व्याख्ये
यः ॥ नन्वाकाशस्वभावेन संयोगमात्रं लक्ष्यते किं सादृश्ये नेत्यत आह विभुत्वादाकाशे
नेति ॥ नातिचिरेण विशेषात् ॥ दुर्निष्प्रपतरमिति दुःखेन निःसरणं क्रियते न तु विलम्बे
नेति मन्यते पूर्वपक्षी विनाश्यफलशरीरे न स्वस्वशरीरं दुःखभागिति दुःप्रपतनं वि
लम्बं लक्ष्यतीति सिद्धान्तः ॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ आकाशसारूप्यं वायुधू
मादिसंपर्कोऽनुशयिनामुक्त इहेदानीं व्रीहियवादिषु ओषधिवनस्पतयस्तिलमाषाजा
यंत इति श्रूयते तत्र संशयः ॥ किमनुशयिनां भोगाष्ठाने व्रीहियवादयः स्थावराभावे
धि

त्याहो देवत्वांतराधिष्ठितेषु पुत्रेषु स्वर्गमात्रमनुभवंतीति॥ तत्र मनुष्यो जायते देवो जायत इत्या
दौ प्रयोगे जनेः शरीरपरिग्रहे प्रसिद्धत्वादत्रापि स्त्रीत्वादिशरीरपरिग्रह एव जनेरर्थस्त्वार्थं
इति स्त्रीत्वादिशरीराण्येवानुशयिन इति युक्तं॥ न च रमणीयचरणाः कपूयचरणा इति व
त्कर्मविशेषासंकीर्तनात्तदभावे स्त्रीत्वादीनां शरीरभावाभावात्क्षेत्रज्ञांतराधिष्ठितानां
मेव तत्संपर्कमात्रमिति सांप्रतं॥ इत्यादिकारिणामिष्टादिकर्मसंकीर्तनात॥ इष्टादेश्च
हिंसादोषदूषितत्वेन सावद्यफलतया चंद्रलोकभोगानंतरं स्थावरशरीरभोगपदुःख
फलत्वस्योपपत्तेः॥ न च न हिंस्यात्सर्वा भूतानीति सामान्यशास्त्रस्याग्नीषोमीयपशु
हिंसाविषयविशेषशास्त्रेण बाधने सामान्यशास्त्रं हिंसासामान्यपदारेण विशेषोपसर्प
णं विलंबेनेति सामान्यशास्त्राद्विशेषशास्त्रस्य शीघ्रतरप्रवृत्तत्वाद्बलवत्त्वादिति सांप्रतं
न हि बलवदित्येव दुर्बलं बाध्यते किं तु सति विरोधे न चेहास्ति विरोधोऽभिन्नगोचर
त्वाभावात॥ अग्नीषोमीयं पशुमालभेतेति हि क्रतुप्रकारकमनाम्नातेऽत्वर्थता मस्य

गमयति न त्वपनयति निषेधापादितामस्पष्टकलंषप्रत्यवायहेतुतां ॥ तेनाकृत्तुनिषेधादस्य
पुरुषस्य प्रत्यवायहेतुता विधेस्तु क्रत्वर्थहेतुतायां को विरोधः ॥ यथाहुः ॥ यो नाम क्रतुमध्यस्थः
कलंजादीनि भक्षयेत् । न क्रतोस्तत्र वैगुण्यं यथा चोदितसिद्धितः इति तस्माज्ज्ञानेमुदश्या
र्थत्वो दृष्टोदिशरीरात्मानुशायिनो जायत इति प्राहोत्मधीयते ॥ भवेदेतदेवं यदि रसाली
यचरणादितिवद्दृष्टादिष्वनुशयवतां कर्मविशेषः ज्ञीपित न चैतदस्ति ॥ न चैषस्यादेः कर्म
णः स्थावरशरीरोपभोग्यदुःखप्रसवहेतुभावः संभवति तस्य धर्मत्वेन स्वरवेकहेतुत्वा
त् ॥ न चैतत् ऊतामाः पश्यु हिंस्याया न हिंस्यादिति निषेधात् क्रत्वर्थायामपि दुःखफल
त्वसंभवः ॥ पुरुषार्थायामेव न हिंस्यादिति निषेधात् तथा हि न हिंस्यादिति निषेधस्य नि
षेध्याधीननिरूपणतया यदर्थं निषेध्यं तदर्थ एव निषेधो विज्ञायते ॥ न चैतत्क्वान्तं ते
वेदेन तेन प्रेरितः करोतीति वत्क्रतुस्वामित्वप्रकरणे समाम्नायते येनानन्तवदन्यस्य निषे
धस्य क्रत्वर्थत्वेन निषेधोपि क्रत्वर्थः स्यात् ॥ पश्वौ निषिद्धयोरपि ज्ञाभागयोः क्रत्वर्थत्वेन

मौ

वा॰ त्रि॰ १
१२

लि३। तत्पंचत्वभावः साध्यांते नेष्टमेवकोपपत्तिनतुसा धनमिसर्पः

निषिद्धस्यापि क्रत्वर्थत्वं संभवेत् ॥ एवं हिंसात्वाद्यभावरहितैरप्यंगांतरैरानर्थ्यभावात्साध्यः क्रतूप
कारो विज्ञायते तस्मादनारभ्याधीतेन न हिंस्यादित्यनेनाभिहितस्य विध्युपहितस्य पुरुषव्यापा
रस्य हिंसाविधिविभक्तिविरोधात् दुःखात्मकत्वेपि हिंसाकर्मभावत्वपरित्यागेन पुरु
षार्थत्वं भाव्यो वा तिष्ठते ॥ आख्याताभिहितस्यापि पुरुषस्य कर्तृव्यापाराभिधानद्वारेणो
पस्थापितत्वात् केवलं तस्य नञ्गतः प्राप्तत्वान्नञनुवादेन नञर्थविधिरूपसंक्रामतीति तेन
पुरुषार्थो निषेध्य इति तदधीनविनियोगेन निषेधोऽपि पुरुषार्थो भवति तथा चायमर्थोऽभि
संपद्यते यत्पुरुषार्थं हननं तन्न कुर्यादिति ॥ क्रत्वर्थस्यापि निषेधे हिंसायाः क्रतूपकारकत्व
मपि वक्तव्यं ॥ न च हिंसा पुरुषोपकारकत्वे समर्पितनिमित्ततत्कल्पनानापत्तेः ॥ न च स्वातंत्र्य
पारतंत्र्ये क्रमति संयोगपृथक्त्वे द्वादिरतावदेकत्र संभवत इत्यस्मात्पुरुषार्थः प्रतिषेधो
न क्रत्वर्थमप्यास्कंदतीति श्रुतिहेतुस्त्रवत्वमेवेष्टादीनां न स्याद्रागादिदोषप्रयोगदुःखफ
लत्वमपीति ॥ आकारादिष्वपि वक्तृव्यापारमंतरेणाभिलापानुरागेनानीत्रीसादिसंयोग

मात्रे नतु तद्देहत्वमिति ॥ अयमेवार्थ उत्सर्गापवादश्च तेनेनोपलक्षितः ॥ अपि च मुख्येनुशयि
नो व्रीह्यादिजन्मनीति ॥ व्रीह्यादिभावमापन्नाः खल्वनुशयिनः पुरुषैरुपभुक्ता रेतःसिग्भा
वमनुभवन्तीति श्रूयते तद्देत व्रीह्यादिदेहत्वेऽनुशयिनो नोपपद्यते व्रीह्यादिदेहत्वे व्रीह्यादिषु
लूनेष्ववहंति नापक्लीकृतेषु व्रीह्यादिषु देहविनाशादनुशयिनः प्रवसेयुरिति कथमनुश
यिनो रेतःसिग्भावः ॥ संसर्गमात्रे तु संसर्गिषु व्रीह्यादिषु नष्टेष्वपि न संसर्गिणोनुशयि
नः प्रवीसत इति रेतःसिग्भाव उपपद्यते ॥ शेषमुक्तं ॥ रेतःसिग्योगोऽथ ॥ सद्यो जातो हि बाल
को न रेतःसिग्भवत्यपि तु चिरजातः प्रौढयौवनः तस्मादपि संसर्गमात्रमिति गम्यते ॥ तत्नि
मित्तानी सर्वत्रैवानुशयिनः संसर्गमात्रं तथा च रमणीयचरणा इत्यादिषु तद्भावमापद्येत इ
त्याह योनेः शरीरं ॥ सुगमं ॥ ॥ इति श्रीवाचस्पतिमिश्रविरचिते भगवत्पादशारीरकभाष्ये
विभागे भामत्यां तृतीयस्याध्यायस्य प्रथमः पादः ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ०

ཀ་ཤིག་༩
༡༥

वाचस्पतिन्ततीयाध्यायद्वितीयपादारंभः

वा॰त्रि॰२
१

ॐ श्रीगणेशाय नमः ॥ संध्ये सृष्टिराह हि ॥ १ ॥ इदानीं तु तस्यैव जीवस्यावस्थाभेदः स्वप्नज्योतिःश्रु
तिष्वर्थे प्रपंच्यते किं प्रबोध इव स्वप्नेपि पारमार्थिकी सृष्टिः आहोस्विन्मायामयीति पथ्यपि ब्रूमि
लोन्यस्यानि वीच्यत या जाग्रत्स्वप्नावस्थागतयोरपि सर्गयोर्मायामयत्वं तथापि यथा जाग्रद्व
सृष्टिर्ब्रह्मात्मभावसाक्षात्कारात्प्रागनुवर्त्तते ब्रह्मात्मस्वभावसाक्षात्कारात्तु निवर्त्तते त
वं किं स्वप्ने सृष्टिराहोस्वित्प्रतिदिनमेव निवर्त्तत इति विमर्शार्थः ॥ इहलोकपरलो
कस्थानयोः संधौ भवं संध्यं ऐहलौकिकवदेनघव्यापारान्नूपादिसाक्षात्कारोपजनाद
नैहलौकिकं पारलौकिकेंद्रियादिव्यापारस्य चभाविष्यतोऽप्रत्युत्पन्नत्वेन न पारलौकिकं
ने च न रूपादिसाक्षात्कारो जिस्वप्नदशा तत्स्थापि भयोर्लौकिकपारस्योतरालत्वमिति
ब्रह्मभावसाक्षात्कारात्प्रागनुवर्त्यरूपैव सृष्टिर्भवितुमर्हतीति प्राप्तमभिसंधिः ॥ इह हि स्व
र्वीण्येव मिथ्याज्ञानानुराहरणं तेषां सत्यत्वं प्रतिज्ञाय ते प्रवृत्तोपयोगित्वात्तु स्वप्नस्य
नमुदाहृतं तेषां हि ज्ञाने पर्यंतभवके घयति तत्तथैवेतिपुनं तथाभावस्यज्ञाना

दोषात्तं रूततयात्वस्यत्वप्रतीयमानस्यतथाभावप्रमेयविरोध्येतकल्पनानानास्पदत्वात्
बाधकप्रत्यपादत्तयात्वमितिचेन्न तस्यबाधकत्वासिद्धेः समानगोचरे हि विरुद्धार्थोपसं
हारणी ज्ञाने विरुध्येते बलवद्दुर्बलत्वनिश्चयाच्च बाध्यबाधकभावं प्रतिपद्येते न
चेह समानविषयत्वं कालभेदेनैव व्यवस्थोपपत्तेः यथा हि द्वीरे दृष्टं कालान्तरे दधि भ
वति एवं रजतं दृष्टं कालान्तरे शुक्तिर्भवेत् नानारूपं वा तद्वस्तु तथ्यस्यातीतावृतपल्लोतिस
हितं चेद्देशः स्वतस्य रजतरूपतां गृह्णाति पश्यस्तु केवलमालोकमात्रोपहृतं स्वतस्येव
शुक्तिरूपतां गृह्णाति एवमुत्पलमपि नीलं लोहितं दिवा सौरीभिर्भाभिरभिव्यक्तं
नीलतया गृह्यते प्रदीपाभिव्यक्तं तु नक्तं लोहिततया एवं समस्तानि द्रव्याणि ततोऽपि स्था त
दीनां गृह्णाति निद्राल्पलुग्गृह्णातीति सामग्रीभेदाद्वा कालभेदाद्वा विरोधाभावः ना
पि पूर्वोत्तरयोर्बलवद्दुर्बलत्वनिर्णयः उभयोरपि स्वगोचरचारितया समानत्वे
न विनिगमना[illegible] हेतोरभावात्तस्माद्दृष्यव्यवस्थानविरोधो व्यवस्थापनीयः तत्सिद्ध

२

भ्रा॰ त्रि॰ २
२

मेतत्॥ विज्ञानस्यैः प्रत्ययास्तस्यैव च। प्रत्ययत्वाज्ज्ञायन्तां भ्रान्तिप्रत्ययवदितीममर्थं अ
तीन्द्रियं दर्शयति अपरस्यानरस्यप्रयोगान्नष्यः स्रजंतद्वति न च न तत्र नरस्यानरस्यप्रयोगा न
पंपानोऽस्मे वेत्तीति विकेथा दुःप्रचारितापी स्रजंतद्वति अन्तिर्व्यावेरक्षपा॥ स्रजंतदिति अते
वेद्वश्रुति संवादं प्रमाणं तं तरसंवादाच्च वलीयस्त्वेन तदनुगुणं तथा न तत्रनरस्याइत्य
स्याः भाक्तत्वेन व्याख्याना तर्जाग्रदवस्थादर्शनयोग्यानसंति न तु नरस्यानस्येतीति॥
अतएव कर्तृश्रुतिः॥ प्रारब्धांतरश्रुतिरनुदाहृता॥ प्राज्ञकर्तृकत्वोज्ञानस्य पारमार्थिक
त्वं विपरीतदिग्नियंतवत्॥ न च जीवकर्तृकत्वान्नप्राज्ञकर्तृत्वमितिसोऽप्यते॥ अ
न्यत्र धर्माद्दन्यत्राधर्मादितिप्राज्ञस्यैव प्रकृतत्वाज्जीवकर्तृकत्वेपि च प्राज्ञा
भेदेन जीवस्य प्राज्ञत्वात्॥ अपि च जाग्रत्प्रत्ययस्य संवादत्वेन पि स्वप्नप्रत्ययाः के
चिद्दृष्टतेन प्रत्यायाः स्वप्ने शुक्लो वरवधूरः शुक्लमाल्यानुलेपनो जल्पितालापनः प्रियप्रव्रतं प्र
त्याहृप्रियपव्रतपेचमेहनिप्रातरेवो वैराप्यध्यजितदानेन नरपतित्वात्मानपि

त

ख्यातिसंवलनात्तथाल्लसत्तोमानमनुभयस्य च प्रत्यपंसत्यमभिमन्यते तस्मात्स्वप्ने पारमार्थि
की सृष्टिरिति प्राप्ते उच्यते॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्॥ इत्यत्र सूत्रं। न
तावद्दीर्घस्य वद्धित्रज्जुस्य परिणामः शुक्तिः संभवति नहि जातीश्वरगृहे चिरस्थितान्यपि रजत
भाजनानि शुक्तिभावमनुभवन्ति दृष्टं ते भवन्ते तरस्थ रजतानुभवसमये ऽन्यो नाकुलेन्द्रियो न
तस्य शुक्तिभावमनुभवति प्रत्येति च न तोभयरूपं च कस्मान्नगोभेदात्कदाचित्स्यात्तोयभावो
नुभयते कदाचिन्मरीचितेति सत्यं तत्पारमार्थिकं स्यात्तोयभावेतत्स्याच्छायामुष्णोपशमनं त
त्ताम्रपङ्क्तिपोतुर्भावितं॥ मरीचिकाध्यामपि रूपं प्रत्यालक्षणं॥ न च मरीचिभिः कस्यचिदप्यजठर
न्योपशाम्यति॥ न च तोयमेव हि विधं उदन्योपशमनसमर्थं दुपशमनमिति युक्तं॥ तद्दर्पक्रियाकारि
त्वव्याहतोयत्वे मात्रयापि तामवुर्वं तोयमेव तस्मात्॥ अपि च तोयं समीचीनत्वाभ्यासस्य है विध्यम
भ्युपेयते न चाभ्युपगमे पि नसस्ते तु महति तथा विसमर्थविधाप्रतितोयमेतदिति सम्वादो न
तदन्यचिमरीचितोयमनुधावेतपपामरीचीननुभवन्॥ अपास्तं सरसाभिमन्यमानोभि

धावति॥ किंमेपरोक्षमरीचिषुपयस्तोयविपर्यासेनसर्वज्ञनानेनप्रत्यक्षमाणेलेष्वविपर्यासोतदेकल्प्य
ते॥ नचहीरदृष्टिप्रत्ययवद्धाचार्यमातुलब्राह्मणस्यप्रत्ययवद्धातोयमरीचिविज्ञानेसमुच्चिता
वबोधिनीस्वानुभवात्परस्परविरुद्धयोर्बाध्यबाधकभावावभासनात्॥ तत्रापिचरजतज्ञा
नपूर्वमुत्पन्नेनबाध्यमुत्तरंतुशुक्तिज्ञानंबाधकंसामिपूर्वकत्वात्प्रतिषेधस्यरजतज्ञानास्त्रा
वस्त्रापकाभावेनशुक्तेरज्ञासायाःप्रतिषेधाभावात्॥ पूर्वज्ञानंसात्तुरजतंशुक्तिज्ञानस्यपूर्वा
धितुमर्हतीतितद्बाधात्मकंचस्वानुभवाद्वसीयते॥ यथाहुः॥ ज्ञामामित्वाद्बाधित्वापरंपूर्वंतु
ज्ञायते॥ पूर्वंपुनरबाधित्वापरेनोत्पद्यतेऽश्वचिदिति॥ नचवक्तव्यमनरद्धावभासिज्ञानंभवि
ष्यतामस्पागोचरयत्नेभविष्यताःस्वसमयवर्तिनंशुक्तिगोचरयत्नप्रत्ययेनबाध्यते॥ का
लभेदेनविरोधाभावादितियुक्तं॥ मानामासयाज्ञानात्प्रत्यहंभविष्यतांतत्प्रभावितत्वानु
मानमुपकारहेतुभावमिवामतिविनाशप्रत्ययोपनिपातेऽप्यमानमाकलयति॥ अस
तिविनाशोपनिपातेरजतसिद्धिःस्यादेवंरजतत्वादनुभूतप्रत्यक्षिज्ञातरजतवत्तथाच

रजतगोचरं प्रत्यक्षं वस्तुतः स्थिरमेव रजतं गोचरेत् तथा च भविष्यच्छुक्तिका ज्ञानकाले रजतं
व्याप्नुयादिति विरोधाच्छुक्तिकाज्ञानेन बाध्यते यथाहुः ॥ रजतं गृह्यमाणं हि चिरस्थायीति
गृह्यते ॥ भविष्यच्छुक्तिकाज्ञानकालं व्याप्नोति तेन तदिति ॥ प्रत्यक्षेणैव चिरस्थायीति
गृह्यत इति केचित्तच्च न तत इति तद्रूपुक्तं यदि चिरस्थायित्वं योग्यता न स्यात् प्रत्यक्षगोचरता
मतेरतीन्द्रियत्वात् ॥ अपि कालांतरव्यापित्वे तद्रूपं कालांतरेण भविष्यतींद्रियसं
प्रयोगाभावात् ॥ तदुपहितसीम्नो व्यापित्वस्याप्यतीन्द्रियत्वात् ॥ न च प्रत्यभिज्ञाप्रत्यय
वद्रजातिसंस्कारः सहकारी येन वर्तमानसम्बन्धकालये तस्मादेतत्संताभ्यासवशेन
प्रत्यक्षानंतरस्मीकृतमेतत्र्यविनश्यद्वस्त्वानुमानसहितप्रत्यक्षाण्युपायमेतत्
स्थिरस्थायीति गृह्यत इति मंतव्यम् ॥ अत एवैतत्स्कंदमतरकालमविवेचयंतः सौग
ताः प्राहुः ॥ द्विविधो हि विषयः प्रत्यक्षस्य ग्राह्योध्यवसेयश्च ॥ ग्राह्योपि लक्षण ए
कः स्वलक्षणः अध्यवसेयस्तु संतान इति ॥ तेन स्वलक्षणस्य प्रत्यक्षोपि प्राह्ये

कोवधान

वा॰त्रि॰२
४

त्वेनव्याख्यातः॥ यत्तु सत्तं स्वप्नदर्शनं मुक्तं तत्राप्याख्यातापि तत्क्षणयने नाख्याने संवा
दाभावात्प्रियवृत्तस्याख्यातस्संवादः स्तु वा लतालीयो न स्वप्नज्ञानं प्रमाणयितुमर्हति ता
दृशस्यैव बहुत्ले विसंवाददर्शनाद् दृशितस्मृति संवादेऽप्यपहृताकात्स्न्येनाभिव्याप्ति
विरह एवतारजन्योस्तु प्रभृति रजनीसमये पिहि भारते वर्षोत्तरे केतुमालादौ वास
रो भवतीति भारतेवर्षे इत्युक्तं॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः॥ दर्शनं मत्ते
के तन्तु स्वर्कस्येत्यस्मदस्मत्तोऽद्युम्मतः एवस्त्रीदर्शनं स्वरूपसाध्या स्वरसधातुविस्तारेर
यो नागरदवस्याप्या मनुवर्तते॥ स्त्री साध्या स्तु माला विलेपनं देतस्मृताः प्रो नानुवर्त्ते
ते॥ न तास्माभिः स्वप्ने प्राप्तव्यापार इति॥ प्राप्तव्यापारवत्वेन भारमार्पितत्वानुमाने ने
त्याद्देऽएकाधकप्रत्यपेन विरुध्यमानं नात्म नेलभत इति भावः॥ वंधमोक्षयोर
तरालिकं तत्तृतीयमेस्वप्नमिति॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ
देहयोगाद्वा सोऽपीति सूत्रद्वयं तत्रोपपादनमस्माभिः प्रथमसूत्रे निरूढव्याख्यातेत्वे १

तयोर्भीव्याप्तिरिति ॥ तदभावो नाडीषु तत्स्युतेरात्मनि चाण्ड हहि नाडीपुरीतत्परस्मात्कालीनो जीव
स्वरूपस्वभावस्थायोस्थानतेन श्रूयंते तत्र किमेषां स्थानानां विकल्पस्या हेतुर्विवस्तु मुच्यः
किं मतो यद्येवं ॥ एतदुक्तो भवति यदा नाड्यो वा पुरीतत्वा स्वरूपस्थानं तदा विपरीतज्ञान
निवृत्तावपि न जीवस्य परमात्मभाव इत्यविद्यानिवृत्तावपि जीवस्य परमात्मभावाय
कारणांतरमपेक्षितव्यं ॥ तच्चैकमेवैव न तत्वज्ञानं ॥ विपरीतज्ञाननिवृत्तिमात्रेणैत
स्योपयोगात् ॥ विपरीतज्ञाननिवृत्तेः अविनाप तत्वज्ञानं स्वरूपभावसिद्धं भवात् ॥
ततश्च कर्मण्येवापवर्गो न ज्ञानेन यथाह ॥ कर्मणैव हि संसिद्धिमास्थिता जनकाद
य इति ॥ अत्र परमात्मैव नाडीपुरीतत्प्रभृति द्वारा स्वरूपस्थानं ततो विपरीतज्ञान
निवृत्तिरिति मात्रयापरमात्मभावोपयोगस्तत्राहितावदेव जीवस्य स्वरूपस्थानं
भवति केवलं तत्वज्ञानाभावेन कर्ममलकषायविद्यापापाक्रांतो पाल्काय तत्व मल
ह्यणं जीवस्य व्युत्थानं भवति तस्मात्प्रयोजनवत्त्वेषाविचारणेति ॥ किंतावत्तासे

ना॰ त्रि॰ र
५

नाडीपुरीतत्परमात्मसु स्वापस्थानेषु प्रसन्नो जीवस्य निलयनं प्रति विकल्पः॥ यथा बहुषु
प्रासादेष्वेको नरेन्द्रः कदाचित्कस्मिंश्चिन्निलीयते कदाचित्कस्मिंश्चिदेवमेवैको जीवः कदाचिन्ना
डीषु कदाचित्पुरीतति कदाचिद्ब्रह्मणि लीयते॥ यथा निरपेक्षा व्रीहियवाः क्रतुसाधनीभूत
पुरोडाशप्रकृति तथा श्रुता एकार्था विकल्प्यन्ते इदं तु समाभाषात्वो वा आयतन आत्मा वा ए
कानिलयनार्थाः परस्परानपेक्षा नाड्यादयो विकल्पमर्हन्ति॥ यत्रापि नाडीभिः प्र
त्यवसृप्य पुरीतति शेत इति नाडीपुरीततोः समुच्चयश्रवणं तथा तासु तदा भवति य
दा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन्प्राण एवैकधा भवतीति नाडीब्रह्मणोर्वाध्या
रयोः समुच्चयश्रवणं॥ प्राणशब्दं ब्रह्म। अथास्मिन्नात्मेब्रह्मणि आत्मजीवस्य एकधा भवती
ति वचनात्। तथाप्यासु तदा नाडीषु सृप्तो भवतीति च पुरीतति शेत इति च निरपेक्षयो
र्नाडीपुरीततोराधारत्वेन निर्देशाद्व्रीहियवयोरेवाधारत्वं॥ इयांस्तु विशेषः॥ कदाचि
न्नाड्य एवाधारः कदाचिन्नाडीभिः संचरमाणस्य पुरीतदेव॥ एवं ताभिरेव संचरमाणस्य ब्र

लैवाधारइतिसिद्धमाधारत्वेनाडीपुरीतत्परमात्मनामनपेक्षत्वे॥ यथा च विकल्पो व्रीहियव
२ द्वहृदयंतरइतिप्राप्ते॥ एवंप्राप्तेऽभिधीयते॥ जीवः सुषुप्तेनैवैतानिनाड्यादीनिस्थानानिपर्याये
णैति न विकल्पेन कस्य नाम संधिः॥ नित्यवदाम्नातानां पदार्थानां केवलेनामनत ऊर्ध्वं तदाभावे
विकल्पते॥ यथाहुः॥ एवमेषोऽष्टदोषोऽपि यद्व्रीहियववाक्ययोः॥ विकल्प आश्रितस्तत्र ग
तिरन्या न विद्यत इति॥ प्रकृते तु साधनीभूतपुरीतदाद्युपस्थिताम्बितयाहि परस्परान
पेक्षौ हि व्रीहियवौ विहितौ॥ नाडीपुरीतत्प्रत्येकं पुरीतदादयः समासाभिनिवेशितयाऽनु तत्र यदि किंतूभयं
पुरीतदादयोऽभिनिवेशयत परस्परानपेक्षत्वं व्रीहियववद्विधानत्वलोके मेकपितास्त्रीवाध्येयापातं
तत्रैत प्रयोगवचनः समुच्चेतुमर्हति॥ न हि यथा विहितानां यागसाधनीभूतप्रवर्तमाने
नैतान्यन्यपायितेन्द्रियाणि नि॥ किंसमुच्चायान्यपायत्वमेतेषां॥ न तेनांगानुरोधेन प्रधानानां स्या
सो गोमवक्रमे कुर्वीतिति वक्तुंतः॥ तस्मात्तोर्यत्र प्रधानानां भ्यासोऽंगानुरोधेन च नोऽन्याय्यः
नेचांगभ्रमे तेंद्रवायवाद्विग्रहानुरोधेन यथा प्रधानस्य सोमयागस्यावृत्तिरेवमत्रापीति

युक्तं॥ सोमेन यजेतेति विहितत्वात्सर्वयागाविधिः॥ तत्र च दशमुष्टिपरिमितस्य सोमद्रव्यस्य सोमसभि
षुणोतीति सोममन्त्रेणावपतीति च वाक्यांतरात्सोमचनपारसद्वारेण यागसाधनतामतर्दे द्रवा
द्व्याघ्रुद्देशेन प्रादेशमात्रे दृढ्दपात्रे ग्रहणानि यथाकल्पनानि संस्काराविधीयंते न तु सोमोद्दे
शेन द्रव्यान्तराद्देवतादेशे तदेव दानां यागनिष्पत्तिलक्षणैककार्यत्वेन विकल्पः स्यात्तां
न च प्रादेशमात्रमेकैकं मृदुपात्रे दशमुष्टिपरिमितसोमरसग्रहणाय कल्पते येन तुल्यार्थतया
ग्रहणानि विकल्पेरन्॥ न च यावन्मात्रमेकं मृद्पात्रं व्याप्नोति तावन्मात्रं गृहीत्वा परिशिष्टं
त्यज्यतेति युक्तं॥ न च दृष्टेसंभवत्यदृष्टकल्पना न्याय्या तस्मात्सकलस्य सोमरसस्य पा
त्रभेदेन संस्काराहित्वमेकैकेन च ग्रहेण सकलस्य संस्कर्तुमशक्यत्वात्तदेवं पर्वसप्तमे
न संस्कारे ऽवपवोत्तरसप्यहोत्तरेण संस्कारइति कार्यभेदादुग्रहणानि समुच्चीयेरन्
तदेवं समुच्चयपक्षे नेद्दशेतानः पूर्वपक्षः प्रातः सवने ग्रहान् गृह्णातीति समुच्चये सति क्रमे
प्रयुपपद्यते आश्विनो दशमो गृह्यते तृतीये हूयते तमेन्द्रवायवादीन् ग्रहान् गृह्णातीति॥ तेषां च
दशमुष्टिपरिमितो पादानस्यादृष्टार्थत्वप्रसंगात्एवं तदृष्टार्थत्वे धरितत्वे यागउपकल्प्यते ५

समुच्चये सति यावदुद्देशेन गृहीतं तावत्समस्तदेवतात्वं तत्र कस्याग्निस्पर्शो यागस्य कृत्स्नो भवतीत्थं
यदि पुनः प्रत्येकं तान्प्रत्येकीकृत्य कश्चन देवतामुद्दिश्य प्रत्येकं तदुपकारकाणि च देवतोद्दे
शादेशान्यपि भवेयुः ॥ न चैतद्दृष्टं केवलादृष्टकल्पनानन्याय्येत्युक्तं ॥ तस्मात्तत्र समुच्चयस्या
वश्यंभावित्वादुद्देशानुरोधेनापि प्रधानाभ्यासस्त्वास्थीयते ॥ इह त्वभ्यासकल्पनायां प्रमा
णाभावात्पुरोडाशस्य चानियमेन प्रवृत्तिर्द्वयोर्यस्मिन्कस्मिंश्चित्त्वात् एकैकपरस्परानपे
क्षाव्रीहिश्रुतिप्रत्येकश्रुतिश्चानियामिका एकार्पितया विकल्पमर्हतो ननु नाडीपुनीतत्परमा
त्मनामन्योन्यानिरपेक्षाणामेकनिलयनार्थत्वसंभवेऽपि न विकल्पो भवेत् ॥ न ह्येकस्मि
न्क्षेपसर्पणमात्रे सर्वे कार्यता भवति ॥ समुच्चितानामप्येकविभक्तिनिर्देशादर्शनात्तेषामेकदेशे ते
प्रासादे शेरत इति ॥ तस्मादेकविभक्तिनिर्देशात्तस्यानेकोऽपि कल्पः कल्पते विनिगमनाविरहो व्या
सादेनादिभाष्यकृता यत्रापि निरपेक्षा इव नाडीः स्पृशतस्थानत्वेन तत्रावपतीत्यादिना ॥ सा
पेक्षासत्त्वानुरोधेन निरपेक्षश्रुतिर्नीतचेतस्पर्शः ॥ शेषमतिकाहितं ॥ ननु यदि बलेनैव नि

वा॰वृ॰टि॰
८

लयस्यानेतन्मात्रमुच्यतां नहतेनाडुपन्यासेनेत्यत आहापि चेति ॥ अपि चेति समुच्चये ॥ तदिद्ध
त्वे ॥ एतदुपपत्तिसहिता पूर्वापरप्रतिरपि साधनीति मार्गो विशेषो यद्युक्तानां नाडीनां तत्र सर्वमा
त्रं नाडीसंकीर्तनमित्यर्थः ॥ पिच्छेनाभिव्याप्तकरत्वेन बाह्यान्विषयान्वेदेति तद्धारकत्वस्व
दुःखाभावेन तत्कारणपापसंस्पर्शेन नाडीस्तुतिः ॥ यत्तु तेजो ब्रह्मतदात्मगमनम् ॥ अपि
च नाड्यः पुरीतच्च जीवस्योपाध्याधार एव भवतीति ॥ अपरमर्थः ॥ अस्तु चेत्यजीवस्याधेयत्व
मिरस्तु अपरमार्थितस्तु न जीवस्याधेयत्वमस्ति ॥ तथा हि नाड्यः पुरीतच्च जीवस्योपाधीनां का
रणानामाश्रयो जीवस्तु ब्रह्माव्यतिरेकात्स्वमहिमप्रतिष्ठो न चापि ब्रह्म जीवस्याधारकत्वा
दात्माधिकरत्यतु व्यतिरेके ब्रह्मणा आधारत्वमुच्यते जीवे प्रति तथा च सुषुप्तावस्थायामु
पाधीनामस्तमुदितावास्तज्जीवस्य ब्रह्मात्मत्वमेव ब्रह्माधारत्वं तदुपाधिकारणमात्राधारत
या तु सुषुप्तदशायां भावजीवस्य नाडीपुरीतदाधारत्वमित्यस्तु तथापि तथा न विकल्प इति ॥ अ
पि च न कदाचिज्जीवस्येति ॥ कोऽसावित्येकं ब्रह्मरूपत्वं जीवस्यात्मनि जाग्रत्स्वप्नरूपेऽपि प्रकारेऽस्य

सुतावस्याया नानात्वं यद्यपि तु शक्यमित्यर्थः ॥ अपि च येऽपि स्थानविकल्पमाश्रित्य तद्देहविशेषज्ञानो
पशमलक्षणस्तु सुप्तावस्थायां गीकृतोऽथ ॥ नैवेयमात्मतत्त्वं विना नाड्यादिषु परमात्माति रि
क्तेषु स्थानेषु पप्यते तत्रस्थितो यं जीवस्यात्मव्यतिरेकाभिमानी सन्नवस्थाविशेषज्ञानवा
न्भवेत्तथापि हि श्रुतिर्यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदिति ॥ आत्मस्थानत्वे तद्दोषाय
त्तत्स्य सर्वमात्मैवाभूत्तत्केन कं विजानीयादिति श्रुतेः ॥ तस्मादप्यात्मस्थानत्वमस्य स्फुरं
नाश्राहीत्याह अपि च स्थानविकल्पाभ्युपगमेऽपीति ॥ अत्र चोद्यति । ना [illegible] नु
मेदविषयस्यापीति ॥ मिथ्यातद्धतिमेतेभिप्यमानस्यापि विषयस्येत्यर्थः ॥ परिहरति बा
ढमेवं स्यादिति न तावज्जीवस्याकाशवतः परिच्छेदः । तस्य ब्रह्मात्मत्वेन विभुत्वादि । उपाधिके
नु परिच्छेद पत्रोपाधिरसन्निहितस्तन्मात्रेन जीवनीयोऽन्यत्तु सर्वं नसि सन्निधानात्तदुमे
कमविच्छिन्नेऽवच्छेदः सन्निहितमपि न वेद तस्मात्सर्वविशेषविज्ञानप्रत्ययमय प्रसुप्ति
समाधौ तात्तदा सर्वोपाध्युपसंहारेऽवच्छेदत्वं तथापि सिद्धमस्य तद्ब्रह्मात्मत्वमित्यर्थः ॥

य

गुणप्रधानभावेन समुच्चयो न समप्रधानतयाऽग्नेयादिवदिति वदन्विकल्पमप्युपाकरोति न
वा॰त्रि॰ टि॰ च वयमिहेति ॥ स्वाध्यायाध्ययनविध्यापादितपुरुषार्थपरत्वस्य वेदराशेरेकेनापि वर्णेन नापुरु
षार्थेन भवितुं युक्तं ॥ न च स्तुतिभावस्याचेतनीवस्वरूपेण नाद्यादिस्थानत्व प्रतिपादनेन किंचित्प्र
८ योजनं वृत्तिभयप्रतिपादनेन लक्षितं तस्मान्न समप्रधानभावेन समुच्चयो नापि विकल्प इति शि
भावः ॥ नीतार्थमन्यत् ॥ ७ ॥ नैव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ यद्यपीश्वरादभिन्नो जीव
स्तथाप्युपाध्यवच्छेदेन भेदं विवक्षित्वाधिकरणेतरारंभः ॥ स एवेति दुःसंपादमिति मिथ एवा
न्यो वेति इश्वरो वेति संभवमात्रेणोपन्यासः ॥ न हि तस्य शुद्धमुक्तस्वभावस्याविद्यावत्त्वमु
पपन्नं संभवो तावद्विमर्शो वक्तरेः स्यादनुपन्यासः ॥ यद्धि हि निवर्तनीयमेवास्य पुंसः श्रा श्रम
द्धं तं कर्म तस्य पूर्वेद्युरनुष्ठितस्याक्षिप्तं स्मर्तिरिति वक्तव्योऽनुप्रत्यभिज्ञानस्य च नार्थः ॥ कोत
एवस्तोहमस्मीत्युक्तं ॥ पुनः प्रतिन्यायं प्रतियोन्याद्रवतीति ॥ आय नमायो नियमेन गमनं न्या
यो जीवः प्रतिन्यायं संप्रसादे स्तुतिभावस्यापवेद्धो तायाद्रवति आगच्छतीति ॥ प्रतियोनि योन्याप्र

निःसुषुप्तोत्थितो मागच्छन्नात्मा घट एव भवति न जातं तदन्तरं तदिदं सुखं तदुःखं वा घोवाक्तिं हे वेति।
अयं तत्र सुषुप्त उत्तिष्ठतीति यो हि जीवः सुषुप्तः शरीरान्तरं उत्तिष्ठति शरीरान्तरं गत स्तु सुषुप्तजीवसं
वेधिनि शरीर उत्तिष्ठति॥ तत स्तु न शरीरान्तरे व्यवहारलोपप्रसङ्गः॥ अपि न जीवो नाम
परस्मादन्य इति यथा घटाकाशो नाम न परमाकाशादन्यः अयं चान्य इव यावद् घटमनुव
र्तते॥ न चासौ दुर्विवेचः स्तदुपाधेर्घटस्याविविक्तत्वात्॥ एवमनाद्यनिर्वचनीयावि
द्योपधानमेहोपाधिकल्पितो जीवो न वस्तुतः परमात्मनो भिद्यते तदुपाध्युद्भवाभिभ
वाभ्यां चोद्भूत इव च्यवमान इव प्रतीयते तत स्तु सुषुप्तावपि क्रमभ्रान्त इव जाग्रदेव
स्यादित्युद्भूत इव तस्याविद्या तदुपानोपाधेरनादितया कार्यकारणभावेन प्रवह
तः स्वविवेचितया तदुपहितो जीवः स्वविवेच इति॥ मुग्धेऽर्धसंपत्तिः परिशेषात्॥ विशे
षविज्ञानाभावान्मूर्छा जाग्रत्स्वप्नावस्थाभ्यां भिद्यते पुनरस्याना अमरणावस्थायाः
अतः सुषुप्तेरेव मूर्छा विशेषज्ञानाभावाविशेषात्॥ विरामृष्टान्सवेपथुप्रभृतयन्तु मु

वा.व.त्रि.द्वि.

५

सेरवीतरप्रभेदाः॥ तथापि कश्चित्सुप्तोत्थितः आह सुखमहमस्वाप्सं प्रसन्नं मे मन इति कश्चि-
त्तु दुःखमस्वाप्सं गुरूणि मे गात्राणि भ्रमत्यनवस्थितं मे मन इति न चैतावता सुषुप्ति-
र्भिद्यते। तथापि विकारान्तरेऽपि नश्छीन सुषुप्तिर्भिद्यते तस्माल्लोकप्रसिद्ध्यभावान्नेयं पंचमाव-
स्थेति सामस्त्येन सा सङ्ख्यते यद्यपि विशेषविज्ञानाभावसाम्येन मोहसुषुप्तयोः साम्यं तथा-
पि नैक्यं न हि विशेषविज्ञानसद्भावसाम्यमात्रेण स्वप्नजागरयोरभेदः। वास्तवं द्रव्या-
पारभावाभावाभ्यां तु भेदः तथा मोहसुषुप्तयोरपि प्रयोजनभेदात्कारणभेदाल्लक्ष-
णभेदाच्च भेदः। अत्र मामानुसर्पाहि ब्रह्मलक्षणं प्रतिः सुषुप्तिशरीरत्यागार्थी तु ब्रह्मलक्षणं
प्रतिमोहः॥ यद्यपि मस्तपि मोहेन मरणं तथाप्यस्ति मोहेन मरणमिति मरणार्थी मो-
हः मुसलसंपातादिनिमित्तस्तथा मोहस्य श्रमादिनिमित्तत्वे श्रमः सुषुप्तस्य सुखने-
त्रादिविकारलक्षणत्वान्मोहस्य प्रसन्नवदनत्वादिलक्षणमेव च सुषुप्तस्य सुषुप्तस्य
तदीतरमेदेऽपि निमित्तप्रयोजनलक्षणभेदादेकत्वे तस्मात्सुषुप्तमोहावस्थयोः ब्रह्मलक्षण

पत्त्वापि स्वप्नसुषुप्तयोरुपाधिदर्शनं संपत्तिर्नेतादृशी मोह इत्युद्दिष्टं संपत्तिः कृत्स्नसाम्यवैषम्याभ्यामर्द्धत्वे यद
चैतरैव स्थानांतरं तदुक्तं भेदं तत्त्वविलयाय यत्नांतरमास्थेयमस्य हेतुं न यत्नांतरमिति चिंताप्र
योजनं॥ न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि॥ अथांतरसंगतिमाह येन ब्रह्मणा
सुषुप्त्यादिष्विति पद्यपितरं न तस्य लमारंभणशब्दादिभ्य इत्यत्र निष्प्रपंचमेव ब्रह्मोप
पादितं तत्र पाचप्रपंचलिंगानां बहूनां श्रुतीनां दर्शनात् उभयावति पुनर्विचिकित्सा तत्त्वानि
वारणाय आरंभः स्यात्तत्त्वज्ञानस्य पवर्गोपयोगीति प्रयोजनं वान्विचारः॥ तत्रोभयलिं
गश्रवणादुभयरूपत्वं ब्रह्मणः प्राप्तं तत्रापि सविशेषत्वनिर्विशेषत्वयोर्विरोधात्स्वाभा
विकत्वानुपपत्तेरेकं स्वतः अपरं तु परतः॥ न च परतंत्रत्वं परमार्थिकं न हि बद्धो राही
नो स्वतः प्रमाणभूतानां दोषतोऽप्रामाण्यमपारमार्थिकं विपर्ययज्ञानलक्षणकार्या
नुत्पादप्रसंगात्॥ तस्मादुभयलिंगकश्रुतिप्रामाण्यादुभयरूपता ब्रह्मणः पारमार्थिकी
ति प्राप्ते उच्यते न स्थानत उपाधितोऽपि परस्य ब्रह्मणः उभयलिंगत्वं संभवः एकं हि पारमा

ननु यथा श्रुतस्य निषिद्धस्य कार्यलक्षणस्य मिथ्यात्वे कथं न चहे
तुहीनामप्रामाण्यं किं चातः स्वतः प्रमाणत्वं ... यं मा
यानुत्पादप्रसंगादिति वाच्यं दृष्टांतवैषम्यात् तथा हि॥ तत्र हि
नाथ ... इति बाधदर्शनात् न हि तद्वदत्रापि ज्ञान
... तानुभवे बाधेन चहेतुः विपर्ययज्ञानाभावे वहिति ज्ञानस्य लक्ष्यः

वाच॰ त्रि॰ द्वि॰

१०

र्पितमन्यत्र ध्यानेऽर्पितं पारमार्थिकत्वे तूपाधिजनितस्य रूपस्य ब्रह्मणः परिणामो भवेत्॥ स
च प्राक् प्रतिषिद्धः तस्माद्विशेषाभावात्स्फटिकमणेरिव स्वभावस्वच्छधवलस्य लाक्षारसावसेको
पाधिरक्तिमा सर्वगंधत्वादिरौपाधिको ब्रह्मण एव व्यक्त इति प्रथमः॥ निर्विशेषताप्रतिपाद
नापरत्वात्श्रुतीनां॥ सविशेषतायामपि प्रत्ययस्यापि प्रवृत्तेः तेजोमय इत्यादीनां श्रुतीनां
ब्रह्मैकत्वप्रतिपादनपरत्वात्॥ एकत्वनानात्वयोश्च एकस्मिन्नसंभवात्॥ एकत्वोगत्वेनैव
नानात्वप्रतिपादनपर्यवसानात्॥ नानात्वस्य प्रमाणान्तरसिद्धतयानुवाद्यत्वादेकत्वस्य
चानधिगतेर्विधेयत्वोपपत्तेर्भेददर्शननिंदया च साक्षादाम्नायसीमाः श्रुतिर्भेदप्रति
पादनात् आकारवद्ब्रह्मविषयाणां च कासांचिच्छ्रुतीनामुपासनापरत्वमस्ति च बाध
के श्रुत्यपरामृष्टे च नानाश्रुतीप्रमाणमपि गृह्येत यथा देवानां विग्रहवत्त्वे सति चात्र सा द्वा
द्वैतापवादेनाद्वैतप्रतिपादनपराः श्रुतयः श्रुतयः कासांचिद्द्वैताभिधायिनीनां तत्प
विलयपरत्वं तस्मान्निर्विशेषमेकरूपं चैतन्यैकरसं ब्रह्म परमार्थतो विशेषास्त्वर्व

गंधत्ववासनीत्वोरुपाधिवशाद्दृष्टस्यादितिस्विद्वंसो प्रमातिरोहितार्थः ॥ अत्र केचित् ॥ हेत्वधिकर
णेक्लृप्यंतीति किं स्वलक्षणं प्रकाशत्वलक्षणं च ब्रह्मणि किं स्वलक्षणमेव ब्रह्मेति प्रकाशत्वलक्षण
मेवेति तत्राद्ये वक्ष्यते उक्तमिति ॥ प्रकाशत्वत्वावैयर्थ्यात् ॥ चरमे तु तत्र च पर्यायपब्रह्मण
सत्यत्वे ते: ॥ सिद्धांतयति ॥ आहुश्चेतत्कात्रे ॥ प्रकाशमात्रेन हि सत्त्वं नाम प्रकाशरूपादन्यत् यथा स
र्वगंधत्वादयोऽपि तु प्रकाशरूपमेव स्यादिति नो भयरूपत्वं ब्रह्मण इत्यर्थः ॥ तदेतदनेनाप्यन्
यद्दूषितं सत्ता प्रकाशयोरेकत्वे ॥ नो भयलक्षणत्वं भेदे नव स्यात् लोपीति निराकृतमिति नाधिक
रणांतरे प्रयोजयति ॥ परमार्थतत्त्व भेदे एव प्रकर्ष प्रकाशवदिति ॥ सर्वेषां च साधारणे प्रविलं
यार्थत्वे सत्यस्वरूपवदेव हितत्प्रधानत्वादिति विनिगमनकारणवचनमनवकाशं स्यात् ॥ एवं
हि तस्यावकाशः स्यात् यदि कश्चिदुपाधिनापरतयारूपमाच्छादीरन्त्यादि द्वीरूपब्रह्मप्रतिपा
दनपरा भवेयुः ॥ सर्वासां तु प्रतिलयार्थत्वेन नीरूपब्रह्मप्रतिपादनार्थत्वेन को विनिगमन
हेतुर्न स्यादित्यर्थः ॥ एकनियोगप्रतीतेः प्रथाजदर्शपूर्णमासवाक्यवदिति ॥ अधिकारणभ्रा

यत्रानुबंधभेदानुमिन्नोऽनयोरप्रतियोग इति॥ कोयं प्रपंचप्रविलय इति॥ वाङ्मनसगोचरप्रपं
चस्य प्रविलयः सार्वविद्युवाग्निसंयोगात्ससमारोपितस्य वा रज्वां सर्पभावस्येव रज्जुतत्व
परिज्ञानात्॥ न तावद्वायुवत् सर्वसाधारणैः पृथिव्यादिप्रपंचः पुरुषमात्रेण शक्यः स
मुच्छेत्तुमपि च प्रलयस्तु कादिभिः पुरुषधौरेयैः सकलमुन्मूलितः प्रपंच इति शून्यं जग
द्भवेत्॥ न च वाङ्मनसवर्त्तत्वज्ञानेन शक्यमुच्छेत्तुं मायारोपितरूपविरोधित्वात्तत्वज्ञानस्येति युक्तं
समारोपितरूपत्वप्रपंचोच्छेदनं तत्वज्ञानपरैरेव वाक्यैर्ब्रह्मतत्वमवबोधयद्भिः वाक्यैः स
मुच्छेत्तुमिति कृतमत्र विधिना॥ नहि विधिशतेनापि विनात्मतत्वावबोधनं प्रवर्त्तेत्स्वा
त्मज्ञान इति वाक्यरूपप्रपंचप्रविलयं वेति प्रवर्त्तितः शक्नोति प्रपंचप्रविलयं कर्त्तुं न चा
स्यात्मज्ञानविधिं विना वेदांतार्थब्रह्मतत्वावबोधो न भवति मौलिकस्य स्वाध्यायाध्य
यनविधेरेव विवक्षितार्थपर्यवसानकल्पस्य वेदांतार्थः फलवदर्थावबोधनपरतामापा
द्यते विद्यमानत्वात् अन्यथा कर्मविधिवाक्यान्यपि विध्यंतरमपेक्षेरन्निति॥ न च चिंतामा

साक्षात्कारस्योर्विधिरिति तत्वसमीक्षायामस्माभिरुपपादितेविस्तरेण चापमर्यस्तत्रैव प्रपंचितः त
स्माज्जर्तिलयवाग्वा वा जुहुयादितिव द्विधिस्वरूपाणि तेत्रात्मा वा अरे द्रष्टव्य इत्यादयो न तु विध
यइति। तदिदमुक्तं द्रष्टव्यादिशब्दा अपि तत्वाभिमुखीकरणप्रधाना न तत्वावबोधविधिप्रधा
ना इति। अपि च ब्रह्मतत्वे निःप्रपंचमुक्ते न तत्र नियोज्यः कश्चित्संभवति। जीवो हि नियोज्यो भ व
वेत्स चेत्प्रपंचपदेवर्त्तेत को नियोज्यस्तस्याविद्यमानत्वात्। अथ ब्रह्मपदे तथापि नियोज्यो ब्रह्मणो
ऽनियोज्यत्वात्। अथ ब्रह्मणोनन्योपि अविद्यया अन्य इवेति नियोज्यः। तदप्युक्तं [redacted]
[redacted] ब्रह्मभावमस्य पारमार्थिकमवगमयतागमेनाविद्याया निरस्तत्वात्तस्मान्नियो
ज्याभावादपि न नियोगः। तदिदमुक्तं जीवो नाम प्रपंचपदस्तस्यैवेति अपि च ज्ञानविधिपर
त्वे तन्मात्रानुष्ठानस्याऽनुतानेस्तत्वप्रतिपादनपरत्वमभ्युपगमनीयं तत्र वरं तत्वप्रतिपा
दनपरत्वमेवास्तु तस्यावश्यमभ्युपगंतव्यत्वेनोभयवादिसिद्धत्वात्। एवं चाकृतं तत्वज्ञान
विधिनेत्याहज्ञेयाभिमुखस्यापीति। न च ज्ञानाधानेप्रमाणं नपेक्षस्यास्तिवाक्यस्योपयोगो वि

वा. त्रि. द्वि.

१२

धेरेव हि तदुपयोगो भवेद्यद्यन्यथाकारं तानध्यापयीत न च तच्छक्यं नापि पुत्रमित्याह न च प्रमाणां
तरे लोके ति किं चान्यन्नियोगनिष्ठत्वे एव च पर्यवसानत्वाम्नाये यदभ्युपगतं भवद्भिः शास्त्रपर्यालो
चनया ऽनियोज्यब्रह्मात्मत्वं जीवस्येति तदेतच्छास्त्रविरोधादप्रमाणकं कल्पितं शास्त्रमनि
योज्यब्रह्मात्मत्वे च जीवस्य प्रतिपादयितुं जीवेन नियुंक्ते ततो ऽर्थ्यं च विरुद्धं च स्यादित्या
ह पूर्वेति दर्शपौर्णमासादिवाक्ये जीवस्य निःप्रयोजनस्यापि विषयत्वं ततो ऽधिकृतनियोज्यभावस्य
नियोज्यता पुत्रकामेन हि तच्छक्यं तस्य नियोज्यतामाह अपि तु लौकिकप्रमाणसिद्धं नियोज्य
तामात्रित्य दर्शपूर्णमासौ विधत्ते इदं तु नियोज्यतामपनयति च नियुंक्ते चेति दुर्घटमिति
भावः ॥ नियोगपरतायां चेति पौर्वापर्यालोचनया वेदांतानां तत्वनिष्ठता स्यात्तान स्यात्तानियो
गनिष्ठते त्यर्थः ॥ अपि च नियोगनिष्ठत्वे वाक्यस्य दर्शपौर्णमासकर्मण इवापूर्वावांतरव्यापा
रात्मज्ञानकर्मणोऽपि अपूर्वावांतरव्यापारादेव स्वर्गादिफलवन्मोक्षः स्यात्तेन तद्रूपस
सिद्धिस्तथा चानित्यत्वं स्यादिति तत्पर्यं स्वर्गवदुर्वेदित्याह कर्मफलवदिति ॥ अपि च ब्रह्मवाक्ये

क्षितिसमपंचान्निष्पन्नं चोपदेशेषु हिंसाद्यानुबंधभेदादेकनियोगत्वमसिद्धं दर्शपौर्णमासप्रयाज
वाक्येषु तु यद्यप्यनुबंधभेदः स्यात्पाप्यधिकारांशस्य साध्यस्य भेदाभावान्न भेद इति ॥ प्रकृते तावद्वं
हि प्रतिषेधति ततो ब्रवीति च भयः ॥ अधिकरणविषयमाह द्वे वाव ब्रह्मणो रूपे इति द्वे वाव
द्वे एव ब्रह्मणो रूपे ब्रह्मणः परमार्थतोऽरूपस्याध्यारोपिते द्वे एव रूपे ताभ्यां हि तद्रूप्यते तेर दर्श
यति श्रुतिः ॥ मूर्त्तं चैवामूर्त्तं च सत्तुञ्जीयमानावधारणौ अत्र पृथिव्यप्तेजांसि त्रीणि भूतानि ब्र
ह्मणो रूपं मूर्त्तं मूर्च्छितावयवं इतरेतरानुप्रविष्टावयवं कठिनमिति यावत् ॥ तस्यैव विशेष
णं तद्गुणीभूतं मर्त्यं मरणधर्मकं स्थितं अव्यापि अवच्छिन्नमिति यावत् सत् अन्येभ्यो विशिष्य
माणं मत् साधारणधर्मवदिति यावत् ॥ घटत्वेऽहो घटतास्यान्योन्यव्यवच्छेदहेतवोऽसाधारणध
र्मा अस्त्वस्येति तस्य ब्रह्मरूपस्य तेजोबन्नस्य चतुर्विशेषणस्य एष रसः सारो य एष सविता तप
ति अथामूर्त्तं वायुश्चान्तरिक्षं चैतद्धि न कठिनमित्यमूर्त्तमेतदमृतं अमरणधर्मकं मूर्त्तेति
मूर्त्तेतरेण महत्त्वमानमेवं यच्च विश्लेषयाद्ध्वंसते न तु तथा भावः संभवत्यमूर्त्तेष्वित्य ॥ एतत्

वा.त्रिद्वि. दिति गच्छति तेषां प्नोतीति । एतत्सर्वं नित्यपरोक्षप्रियाः ॥ तस्यैतस्यान्नमयस्यैतस्मान्मतस्यैतस्य प
१२ तएतस्य तास्यैष रसोपएव । किंचित्कावित मंडले पुरुषः करणात्मको हिरण्यगर्भः प्राणरूपः त्व
स्य स्यैष रसः स्मारः नित्यपरोक्षतां च स्मार्य इत्यधिदैवते कोपाध्यात्मामिदमेव मर्त्त्यपरव्यत्यात्मा
तराकाशात्म्यां मत त्रयं शरीरारंभकमेतन्मत्वैर्मेतत्स्थितमेतत्सत्य त स्यैतस्यामृतस्यैतस्यामृ
तस्यैतस्य स्थितस्यैतस्यमृतत एव रसोयं चक्षुः सतो ह्येष रस इति ॥ अथामूर्त्तं प्राणश्चायश्चाय
मंतरात्मन्नाकाशः एतदमृतमेतद्यदेतत्स्ततस्यैतस्यामूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य
त्यस्यैष रसो योयं दक्षिणे क्षन्पुरुषः त्यस्य ह्येष रसः ॥ लिंगस्य हि करणात्मकस्य हिरण्यगर्भस्य
दक्षिणक्षस्थानं ज्ञाते विगतं तदेवेवृत्तमेतौ पाधिकयोर्मूर्त्तामूर्त्तयोराध्यात्मिकाधि
दैविकयोः कार्यकारणभावेन विभागो व्याख्यातः सत्यशब्दवाच्ययोः ॥ अथेदानीं तस्य करण
त्मनः पुरुषस्य लिंगस्य रूपं वक्तव्यं मूर्त्तामूर्त्तवासनाविज्ञानमयं विचित्रं मायामहेंद्रजालोप
मं द्रष्टुचित्रं दर्शयतीति श्रुतिः ॥ तद्यथा माहारजनमित्यादिना ॥ एतदुक्तं भवति मूर्त्तामूर्त्त

तेवासनाविज्ञानमयं विचित्रे रूपं लिंगस्येति ॥ तदेवं निरवशेषं सवासनेन कृत्स्नस्य रूपमुक्तौ यत्
त्वात्स्यसत्यस्य सत्यमुक्तं ब्रह्मेति तत्त्वरूपावधारणार्थमिदमारभ्यते यतः सत्यस्य रूपं निःशेषमुक्तमतो
वशिष्टं सत्यस्य यत्सत्यं तत्तस्मान्नेतरेतदुक्तिहे तदुक्तं स्वरूपं वक्तव्यमित्याह अथात आदेशः कथनं
सत्यसत्यस्य परमात्मन इत्यमाह नेति नेति एतदर्पि कथनार्थमिदमधिकरणं न नु किमेतावदेवा
देशरूपमुतेतः परमन्यदप्यस्तीत्यत आह न ह्येतस्मा ब्रह्मण इति नेत्यादिश्यादन्यत्परमस्ति यदादे
शरूपं भवेत्तस्मादेतावदेवादेशरूपं नापरमस्तीत्यर्थः ॥ अत्रेदं विमर्शे नेति नापत्त्वं निहितं तत्परामृष्टं तन्नि
षिध्यते न वा कं निहितं च मूर्तामूर्तं सवासनेन रूपद्वयं ब्रह्म स्वरूपं परिशेष्यत इति ॥ यद्यपि तेषुतेषु
वेदान्तप्रदेशेषु ब्रह्मस्वरूपं प्रतिपादितं तदसद्भाव + तद्वचनं दुर्बलत्वेन च ब्रह्म तत्रेदं विचार्यते किं रू
पद्वयं सवासनं ब्रह्म च सर्वमेव च प्रतिषिध्यत उत ब्रह्मैवाप्यवासनं रूपद्वयं + वज्ञानं च निर्दि
तमस्तीत्येवोपलब्धव्यमिति चास्य सत्वमवधारितं तथापि सद्बोधरूपं तद्ब्रह्म सवासनमस्तीमस्ती
रूपसाधारणतया च सामान्यं तस्य चैतद्विशेषाः तौ द्वयो न च तद्विशेषनिषेधे सामान्यमवस्था

बा॰ सि॰ टि॰ १८

तु मर्हति निर्विशेषस्य सामान्यस्यायोगात् ॥ यथाहुः ॥ निर्विशेषं न सामान्यं भवेच्छशविषाणवदिति त
स्मान्तत्र द्विशेषनिषेधेन तत्सामान्यस्य ब्रह्मणो न वस्यानात्मवैरूप्ये वापि निषेधः ॥ अत एव न स्येतस्मादि
ति नेत्यन्यत्परमस्तीति निषेधात्परं नास्तीति सर्वं निषेध्यमेवेत्तत्तमाहृत्य इति ॥ अस्तीत्येवोपलब्धव्य
इति चोपासनाविधानवर्त्मेयं न तस्मिन्नेवेवास्यतत्त्वे तत्प्रकृतं सार्थं चास्मद्भावता नाति दूय चा
न्यत्र ब्रह्मस्वरूपप्रतिपादनं तदपि सत्तो सत्तेरूपप्रतिपादनं न विनिषेधार्थं समस्ति हि तेऽपि च तत्र
निषेधो योग्यत्वात्संभवस्यते यथाहुः ॥ येन समस्यास्मसंबन्धो दूरस्य स्थापितेन तद्वितत्स्मात्म्य
वैरूप्ये वा विशेषेण निषेध इति प्रथमः पक्षः ॥ अथवा पृथिव्यादिप्रपंचस्य समस्तस्य प्रत्यक्षादिप्र
माणसिद्धत्वात् ब्रह्मणः प्रत्यवाशनमार्गगोचरतया सद्ब्रह्मप्रमाणविरहात् वेतरस्यास्य निषेध इति
विशये प्रपंचप्रतिषेधेन समस्तप्रत्यक्षादिव्याकोपप्रसंगात् ॥ ब्रह्मप्रतिषेधे त्वव्याकोपात् ब्रह्मैव प्रति व
षेधेन संबध्यते योग्यत्वात् प्रपंचस्तु विपरीतत्वात् ब्रह्मस्ता तु तद्रूपताभावस्तच्च नास्येति मध्यमः पक्षः
तत्र प्रथमं पक्षं निराकरोति न तावद्रूपमयप्रतिषेध उपपद्यते स्वरूपवादप्रसंगादिति अथ समाभिसं

धिः॥ उपाधयोऽस्मिन्पृथिव्यादयोऽविद्याकल्पिताः नतुस्वो णकर्कादपइवविशेषाकारत्वस्य नचोपा
धिविगमे उपहितस्याभावोऽप्रतीतिर्वा न खलुपाधीनां दर्पणमणिकृपाणादीनामपगमे मुख
स्याभावोऽप्रतीतिर्वा तस्मादुपाधिनिषेधेऽपि नोपहितमात्रस्याविषाणप्रमानताप्रत्ययो वा॥ न
च नेति नेतीति सन्निधानाविशेषात्सर्वस्य प्रतिषेध्यत्वमिति युक्तं॥ नहि भावमनुपाश्रित्य प्रति
षेध उपपद्यते किंचिद्धि कंचिन्निषिध्यते न पुनास्य पः प्रतिषेधः शशः प्रतिपत्तुं तदिदमुक्तमप
रिशिष्यमाणे चान्यस्मिन्नन्य इतरः प्रतिषेद्धुमारभ्यते तस्य प्रतिषेद्धुमशक्यत्वात्तस्यैव परमार्थत
त्वापत्तेः प्रतिषेध्यानुपपत्तिः॥ मध्यमपक्षे प्रतिद्धिपति नापि ब्रह्म प्रतिषेध्य उपपद्यते युक्तं यन्नैस
र्गिकाविद्याप्राप्तः प्रपंचः प्रतिषिध्यते प्रातिस्विकत्वात्प्रतिषेधस्य॥ ब्रह्म तु नाविद्याप्रसिद्धं नापि प्र
माणांतरस्य सत्त्वेन प्राप्तं प्रतिषेधनीयं तथा च प्रकृतस्य तादृशः प्रपंचः स तत्पर इति स ब्रह्म
णि प्रमाणमिति कथमस्य निषेधोऽपि प्रमाणवान्॥ न च पर्युदासाधिकरणपूर्वपक्षो न्यायो
न विकल्पो वस्तुनि सिद्धस्वभावे तस्यानुपपत्तेः॥ न चावाङ्मनसगोचरे बुद्धाबाले दिवं तु शक्यः

वा॰त्रि॰द्वि॰
९५

आकाशस्यरूपं निषिध्यते॥ प्रपंचस्य च नाप्यविद्यासिद्धो नरूपब्रह्मणि प्रतिषिध्यत इत्युक्तं॥ तास्मिन्मा
मनुपपत्तिमाशंक्येत्याकं नापं ब्रह्म प्रतिषेध्य उपपद्यत इति॥ हेत्वंतरमाह ब्रह्मणेते ब्रह्मणीति उपक्रमवि
रोधादिति उपक्रमस्य परामर्शोपसंहारपर्यालोचनया हि वेदांतानां सर्वेषामेव ब्रह्मपरत्वमुपपा
दितं प्रपंचमेव्यथाये॥ न च मासत्प्रामाकोद्योपादूरतरस्यैन प्रतिषेधे नैषां संबंधः संभवतीति॥ पञ्चवा च
ङ्मनसातीतत्वाद्ब्रह्मणः प्रतिषेधस्य न प्रमाणांतरविरोध इति तत्राह वाङ्मनसातीत
त्वमपीति॥ प्रतिपादयंति वेदांताः महता प्रयत्नेन ब्रह्म। न च निषेधाय प्रतिपादनेऽनुपपत्ते
रित्युक्तमथ सत्वात्॥ इह नीतिनुतिः प्रयोजनमित्युक्तं प्रक्षालनाद्धि पंकस्येति न्यायात् स्वा
धेहेतवाचा मनसि सन्निधानात् ब्रह्मणो वाङ्मनसातीतत्वं नोजसमपि तु प्रतिपादनप्रक्रि
याप्रक्रमएव यथा गवादयो विषया माहात्म्यं गंगादि न यथा प्रतिपाद्यंते प्रतीयंते च नैवं ब्रह्म
यथाहुः॥ भेदप्रपंचविलयद्वारेण च निरूपणमिति ननु प्रकृतप्रतिषेधे ब्रह्मणोपि कस्मान्न
प्रतिषेध इत्यत आह तद्धि प्रकृतं प्रपंचितं चेति प्रधानं प्रकृतं प्रपंचस्तु प्रधानेन ब्रह्मणा तस्याब

ष्टं ततया प्रपंचावछेदकत्वेनाप्रधानत्वादित्यर्थः॥ ततोन्यद्ब्रवीतीति प्रतिषेधात् अन्यद्योब्रवीतीति
तन्निर्वचनं नह्येतस्मादित्येव परानं ह्येतस्मादितिनेतिनेत्यादिष्टाद्ब्रह्मणोन्यत्परमस्तीतिव्या
ख्याने तद्प्रपंचप्रतिषेधात् अन्यद्ब्रह्मैव ब्रवीतीतिव्याख्येयं॥ यदातु नह्येतस्मादिति सर्वनाम्नाप्र
तिषेधो ब्रह्मण आदेशः परामृश्यते तदापि प्रपंचप्रतिषेधमात्रेन प्रतिपत्तव्यं अपितु तेन प्रति
षेधेन भावरूपं ब्रह्मोपलक्ष्यते कस्मादित्यत आह ततोब्र वीति च भूय इतिं यस्मात्प्रतिषेध
धस्य परस्तादपि ब्रवीति अथ ब्रह्मणो नामधेयं नाम सत्यस्य सत्यमिति तथा च श्रुतिः
प्राणा वै सत्यमिति माहारजनाद्युपमितेलिंगमुपलक्ष्यापि तत्खलु सत्यमिति नवावेदया॥
तस्यापि परं सत्यं ब्रह्मेति तदेव परतः प्रतिषेधस्य परस्ताद्ब्रवीति तस्मान्न प्रपंचप्रतिषेधमात्रं ब्र
ह्म अपितु भावरूपमिति॥ तदेवं पूर्वस्मिन्व्याख्याने निर्वचनं ब्रवीतीतिव्याख्यानं॥ अस्मिं
स्तु सत्यस्य सत्यमिति ब्रवीतीति व्याख्येयं शेषमतिरोहितार्थं॥ उभयव्यपदेशात्त्वहिकुंडल
वत्॥ अनेनाहिरूपेणाभेदः कुंडलादिरूपेणतु भेद इत्युक्तं॥ तेन विषयभेदाद्भेदाभेदस्यो

रविरोधइति॥ एकविषयत्वेवासर्वदोपलब्धेरविरोधः। विरुद्धमितिहिनः कुतः संप्रत्ययः नयत्प्रमाणे
नोपलभ्यते आगमनस्य प्रमाणस्यैकगोचरत्वेपि भेदाभेदौ प्रतीयमानौ न विरोधमावहतः
सवितृप्रकाशयोरिवप्रत्यक्षप्रमाणवृत्तभेदाविति प्रकाशांतरेणभेदाभेदयोरविरोधमाह
प्रकाशाश्रयवद्वातेजस्त्वात्॥ तदेवं परमतमुपन्यस्य स्वमतमाह पूर्ववद्वा॥ अयमभिसंधिः॥
यस्मात्तं वस्तुनो अहित्वेनाभेदः कुंडलत्वेन भेदइतिस एवं ब्रुवाणः प्रष्टव्यो जायते किमहित्व
कुंडलत्वे वस्तुनोभिन्ने उताभिन्ने इति यदि भिन्ने अहितकुंडलत्वे भिन्ने इति वक्तव्ये न तु वस्तु
नस्ताभ्यांभेदाभेदौ नखल्वन्यभेदे भेदाभ्यामन्यद्भिन्नमभिन्नं वा भवितुमर्हति कौतिप्रसंगा
णात्॥ अथ वस्तुनो नान्यत्वे तेअहित्वकुंडलत्वे तयोः सात्विकोभेदाभेदयोर्विषयभेदः स्यैर्वस्तु
नोऽनन्यत्वेनाभेदात्॥ नचैकविषयत्वेपि सहानुपलभ्यमानत्वाद्भेदाभेदयोरविरोधः॥ परस्प
रविरुद्धयोरपिअविरोधेवा नाम विरोधो व्यवतिष्ठेत॥ नच सहानुपलभ्यमानं विचारसहं भा
विकं भवितुमर्हति देहात्मभावस्यापि सर्वदानुपलभ्यमानस्य भावित्वप्रसंगात्॥ विपंचितं

नैतदस्माभिः प्रपञ्चज इति नेह विप्रतिपत्तेस्तस्माद् नाप्यविद्याविजृम्भितमेवैकस्यात्मनो जीवभा
वभेदेन भाविकः तथा च तत्त्वज्ञानादविद्यानिवृत्त्यापवर्गसिद्धिः तत्त्विके त्वे तस्य न नानानिवृ
त्तिसंभवः ॥ न च तत्त्वज्ञानादन्यदपवर्गसाधनमस्ति ॥ यथाहुः श्रुतिः तमेव विदित्वातिमृत्युमेति
नान्यः पन्था विद्यतेऽयनायेति शेषमतिरोहितार्थं ॥ परमतः सेतून्मानसंबंधभेदव्यपदेशे
भ्यः ॥ यद्यपि श्रुतिषु चतुष्पाद्ब्रह्मव्यतिरिक्तं तत्त्वं नास्तीत्यवधारितं तथापि सेत्वादिश्रुतीनामापा
ततस्तद्विरोधदर्शनात् ॥ तन्निरासं समाधानार्थमयमारंभः ॥ जगतोऽस्य प्रकाशवदनेनतव
ज्योतिष्मदायतनवदिति पादा ब्रह्मणश्चत्वारः तेषां पादानामर्द्धं न्याखेशफाः । तेषां वस्य ब्रह्मणः
इत्यष्टाशफं ब्रह्म षोडशकलं षोडशकलं तद्यथा प्राची प्रतीची दक्षिणोदीचीति च तस्रः
कलाः अयं वा एव कलाः चतुष्कलात्मकः प्रथमः पादः ॥ एतदुपासनात् प्रकाशवान्मुख्यो
भवतीति प्रकाशवान्नाम ॥ अथापरः पृथिव्यन्तरिक्षं द्यौः समुद्र इति च तस्रः कलाः एव द्विती
यः पादोऽनन्तवान्नाम सोपासनेनानन्तवत्त्वेन गुणेनोपास्यमानोऽनन्तवत्त्वमुपासकस्यावहती

तिमानं तवान्याद ॥ अपाङ्गिः स्मर्यस्त्रं द्रुमाविधुरिति चतस्रः कलाः सत्स्योतिष्मान्नाम पादस्त्व
तीपसंज्ञं दुपासनाज्ज्योतिष्मान्भवतीति ज्योतिष्मान्पादः ॥ अथ प्राणश्चक्षुः श्रोत्रं वागिति चतस्रः
कलाश्चतुर्थः पादः आयतनवान्नाम एते प्राणादयो हि गंधादिविषयाणां तेषामायतनमास्त्यतो
गंधाधनं भवतीति आयतनवान्नाम पादः तदेवं चतुष्पाद्ब्रह्म षोडशकलं प्रक्रिते
कृत्या श्रुतिज्ञानतो ब्रह्मणः परमन्यदस्ति ॥ स्यादेतत् श्रुति चैतादृशं रव्याप्योच्यते मेतावदिस
तश्चाहारमितमस्तीति प्रमाणसिद्धं नत्वेतावदिति तात्पर्यः ॥ भेदव्यपदेशश्चान्यत्र प्रकारः ॥ आधारत
स्यातिरेकात्स्याव्वधितस्य ॥ सामान्यात्तु ॥ जगतज्ज्ञानार्यादानं च विधारकत्वं सेतुसामान्यंय
पाहितेतवः पदं धारयंतितदुपादानत्वादेवं ब्रह्मापि जगद्धारयतितदुपादानत्वात्तन्मर्यादानं च
२ विधारके ब्रह्मणि इतेपासति चपलस्थलचलकल्लोलमालोकल्लोलोज्ज्वलतिंधिरिलापरिमं
डलमवगिलेत ॥ वडवानलो वा विस्फूर्जज्ज्वालाजटिलो न गडुस्मासाद्रावयेत ॥ पवनः
प्रचंडो वाऽकांडमेव ब्रह्मांडं विघटयेदिति ॥ तथा च श्रुतिः ॥ भीषास्माद्वातः पवत इत्यादिका ॥

मनसो ब्रह्मप्रतीकस्य समारोपितब्रह्मभावस्य वाक्प्राणचक्षुःश्रोत्रमिति चत्वारः पादाः मनो हि
वक्तव्यघ्रातव्यद्रष्टव्यश्रोतव्यान्गोचरान्वागादिभिः संचरतीति संचरणसाधारणतया मन
सः पादाः तदिदमध्यात्मं आकाशस्य ब्रह्मप्रतीकस्याग्निवाय्वादित्यदिश इति चत्वारः पादाः॥
ते हि व्यापिनो नभस उदर इव गोः पादाः विलग्ना उपलक्ष्यन्ते इति पादाः तदिदमधिदैवतं त
देनेन पादद्वयस्थितिं वैदिकं निदर्शनं व्याख्याय लौकिकं वेदानिरुद्धनमित्याह अथ वा पा इत्यादि
ति॥ तद्धितीहापि मंदबुद्धीनामाध्यानस्य व्यवहारापेक्षया॥ स्थानविशेषात्प्रकाशादिवत्॥
घटाद्युपाधिस्थानविशेषयोगादुक्तस्य ज्ञाप्यत्वमपो विशेषविज्ञानस्योपाध्युपरमेऽपि भवे
त्सुषुप्तावस्थायामिति॥ तथा मेदव्यपदेशोऽपि त्रिविधो ब्रह्मण उपाधिभेदापेक्षयेति॥ यथा सौ
वर्णजालमार्गनिवेशिन्यः सवितुर्भासो जालमार्गोपाधिभेदाद्भिन्ना भासन्ते तद्वद्गुणसेतु
गमभिन्नं मंडलेनैकीभवंत्यतस्तेन संबध्यंत इव एव मिलापीति॥ स्यादेतदेकीभावः
कस्मादिह संबंधः कथंचिद्व्याख्यायते न मुख्य एवेत्येतत्सूत्रेण परिहरति॥ उपपत्तेश्च॥ स्व

पा॰सि॰बि॰
१८

त्यपीतद्इति हि स्वरूपसंबंधं ब्रूते ॥ स्वभावस्त्वेरनेन संबंधत्वेन स्पृष्टस्ततः स्वाभाविकस्तादा
त्म्यान्नातिरिच्यत इति तदुपपादितमित्यर्थः ॥ तथा भेदोपि त्रिविधो नान्यादृशः स्वाभावि
क इत्यर्थः ॥ तथान्यप्रतिषेधात् ॥ सुगमेन भाष्येण व्याख्यातम् ॥ अनेन सर्वगतत्वमायाम
शब्दादिभ्यः ॥ ब्रह्मणो हेतुत्वसिद्धावपि न सर्वगतत्वे सर्वव्यापितावसेया ब्रह्मणः स्वरूपेण रूपव
त्वसिद्धौ तीत्यत आह अनेनेत्यादि निराकरणेन परहेतुनिराकरणेनान्यप्रतिषेधसमा
श्रयणेन स्वसाध्यनोपन्यासेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति ॥ आहेतोः सिद्धे सर्वो
पमर्देनिर्वचनीयः प्रपंचावभासो ब्रह्माधिष्ठान इति सर्वस्य ब्रह्मसंबंधाद्ब्रह्म सर्वगतमिति
सिद्धं ॥ फलमत उपपत्तेः ॥ सिद्धांतोपक्रममस्मिन्नधिकरणं संप्रपादेतन्नित्यशुद्धबुद्धमुक्तस्व
भावस्य ब्रह्मणः कुत ईश्वरत्वं कुतश्च फलहेतुत्वमपीत्यत आह तस्यैव ब्रह्मणो व्यावहारि
स्यामिति ॥ नास्य पारमार्थिकं रूपमाश्रित्यैतच्चिंत्यते किंतु सांव्यवहारिकमेतच्च तपसाचीय
ते ब्रह्मेति व्याचक्षाणैरस्माभिरुपपादितं ॥ इष्टफलं स्वर्गः ॥ यथाहुः ॥ यन्न दुःखेन सं

भिन्नेन नरकस्य समन्वेतरं ॥ अभिलाषोपनीतं च सुखं स्वर्गपदास्पदमिति ॥ कश्चिदसमवीक्ष्यादिष्ट्या
नभोग्यव्यामिश्रसन्तुष्टभोग्यं ॥ तत्र तावत्प्रतिपद्यते ॥ फलस्य तदीश्वरात्कर्मभिराराधितादवितु
मर्हति अपक्वकर्मण एव फलं तस्मात्प्रभवति त्यतश्चाह कर्मण्यचिन्त्यशक्तिविनाशितः प्रत्यहं विना
शि न्विति ॥ चोदयति ॥ स्यादेतत् ॥ कर्मविनष्टमपीति उपात्तमपि फलं भोक्तुरयोग्यत्वात्कर्मान्तर
प्रतिबंधाद्वा न भुज्यत इत्यर्थः ॥ परिहरति ॥ तदपि न परिस्फुरतीति ॥ नहि स्वर्गस्थात्मानं ल
भतामित्यधिकारिणः कामयन्ते किं तु भोग्योऽस्माकं भवत्विति ॥ तेन पादप्राणेभिः काम्यते
तादृशस्य फलत्वमिति भोग्यमेव सत्फलमिति न च तादृशं कर्मणा नेतरस्मिन्निति कथं फलेस
दपि स्वर्गरूपेण ॥ अपि च स्वर्गनरकौ तीव्रतमे सुखदुःखे इति तद्विषये त्वनुभवेन भोगा
परनाम्ना वक्तव्यं भवितव्यं तस्मादनुभवयोग्ये सन्नतु अभ्यमानेशाशस्त्रगवन्न स्यादिति निश्ची
यते चोदयति अपि च तस्मात् कर्मणां तत्तत्फलोत्पादकं कर्मनाशीदस्तु वेदेति परिहरति
तदपि नेति यद्यप्युक्तं तं न तत्कर्म वेदेन नाधिष्ठितं प्रवर्तत इति सम्ब्धागमाभ्यां मवधारितं

मी॰ त्रि॰ द्वि॰
१८

तस्मादपूर्वेणाप्यचेतनेनचेतनाधिष्ठितेनैव प्रवर्त्तितव्यं नान्यथेत्यर्थः॥ न चापूर्वं प्रामाणिकम
पीत्याह तदसिद्धत्वे चेति॥ अतत्वाच्च॥ अकालादेरन्यप्रतिसिद्धतेनोपक्रम्यपूर्वपदेन गृह्णाति॥ ध
र्माधर्मानिरतएव॥ अतिमाह अनुपपत्तेतावदिति॥ ननु स्वर्गकामो यजेतेत्यादयः श्रुतयः फल
प्रति न साधनतया यागं विदधति॥ तथाहि। यदि यागादय एव क्रियमाना तदतिरिक्ता भावना
तयाधित एव स्वपदेभ्यः पूर्वापरीभूताः साध्यस्वभावा गम्यंते इति न साध्यांतरमपेक्षंते
इति न स्वर्गेण साध्यांतरेण संबंधुमर्हंत्ययाचितदतिरिक्ता भावनास्ति तयाप्यसौ भाव्या
पेक्षापि स्वपदोपात्तपूर्वीभूतं गतं न भाव्यधात्वर्थमपहाय नान्यपदोपात्तमुररूपविशेषणं
न स्वर्गादि भाव्यतया स्वीकर्त्तुमर्हति॥ नैवैकस्मिन्वाक्ये साध्यद्वयसंबंधसंभवः वाक्यभेद
प्रसंगात्॥ न केवलं शब्दतो वस्तुतः पुरुषप्रयत्नस्वभावनायाः साक्षात्धात्वर्थ एव सा
ध्यो न तु स्वर्गादिः तस्य तद्व्याप्यत्वात्॥ स्वर्गो देशस्तु नाम पदाभिधेयतया सिद्धरूपस्याख्या
तवाच्यसाध्यं धात्वर्थं प्रतिभातं मव्यापोपदिश्यत इति न्यायात्साधनतयान्वयेनाभि

सेवेधः। तथा च परमर्षि सूत्रे द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबंधः इति। तथा च कर्मणो
यागादेर्दुःखत्वेन पुरुषेणासमीहितत्वात् समीहितस्य च स्वर्गादेः साध्यत्वात् यागादयः पुरुष
स्योपकुर्वत्यनुपकारिणां चैतेषां न पुरुषः प्रवृत्तेरनीशानस्ततः तेषु भवत्वधिकारी त्वधिका
राभाव प्रतिपादितानर्थपरिहाराय कृत्स्नस्यैवाम्नायस्यानिर्मुक्तनिखिलदुःखानुप
गनित्यसुखमयब्रह्मज्ञानपरत्वं भेदप्रपंचविलयनद्वारेण तथा हि सर्वत्रैवाम्नाये कर्मा
तस्याधिकृतस्य प्रविलयो गम्यते तथा स्वर्गकामो यजेतेति शरीरात्मभावप्रविलयः॥ २
हस्वल्पाधातो देहातिरिक्तात्मा मुष्मिकफलोपभोगसमर्थोऽधिकारी गम्यते तत्राधिकार
स्यानेन क्रमेण निराकरणात्॥ आत्मनोपि सजातीयमानस्य विचारासमर्थोऽपि तामात्रेण वस्था
नात् ज्ञानेन वाक्येन देहात्मभावप्रविलापः तत्परेण क्रियते। जोदोहनेन पशुकामस्य
प्रणयेदित्यत्रापि ज्ञापाततोऽधिकृताधिकारानवगमात् अधिकारिभेदप्रविलयः। निषेधवाक्या
नि च साक्षादेव प्रवृत्तिनिषेधेन विधिवाक्यानि चान्यानि संग्रहणाय जेत ग्रामकाम इत्यादी

वा॰ त्रि॰ टि॰
२॰
प्र

न्निनकां यहणादिप्रवृत्तिप्रकरणेऽपि तथा यांतरोपदेशेन सेवादिदृष्टोपायप्रतिषेधार्थोऽनियपादि
षं भुंक्ष्व मा स्पृगहे भुंक्ष्व इति॥ तथा च रागाद्याप्तिप्रवृत्तिप्रतिषेधेन शास्त्रस्य शास्त्रत्वम
प्युपपद्यते रागनिबंधनं तथायोपदेशद्वारेण प्रवृत्तिमनुजानतो रागसंवर्द्धनाद् शास्त्र
त्वप्रसंगः तन्निषेधेन तु ब्रह्मलोकप्राप्तावनाद्यशास्त्रं भवेत् तस्मात् कर्मफलसंबंधस्याप्रा
मासिकत्वाद् नादि विचित्रविपाकसहकारिण ईश्वरादेव कर्मानपेक्षाद्विचित्रफलोत्पत्तिः॥
कथं तर्हि विधिः किमत्र कथं प्रवर्त्तनामात्रत्वाद्विधेस्तस्य चाधिकारभेदेनापि उपपत्तेः॥
नहि योयः प्रवर्त्तयति सर्वोधिकृतमपेक्षते प्रवर्त्तनादेः प्रवर्त्तकस्य तदनपेक्षत्वादिति यं
कामयमानि क्रियते तत्र च विधिः क्रिते विषयभावोपगमात्स्यागः स्वर्गकामो यजेतेत्यादि इति ग
म्यते॥ अन्यथा स्वेननुष्ठानात् कोयोग आपद्यते प्रथमभिसंधिः॥ उपदेशो हि विधिः यथो
तस्य ज्ञानमुपदेश इति॥ उपदेशस्त्वनियोज्यप्रयोजने कर्म्मणि लोकशास्त्रयोः प्रसिद्धः तथा
पार्श्वे सोऽय कामोऽजीर्णे भुंजीत॥ एवमस्तु पंथाः गच्छ तु प्रवानने नेति॥ न त्वाज्ञादिरिव नियो

यजेत स्वर्गकाम इत्यत्र अर्थीमात्रवाज्ञादी भावनाभाव्यविषयिणः प्रत्यर्थ
भावना

त्तप्रयोजनज्ञानाभिप्रायस्य प्रवर्तकत्वात्तस्य चापौरुषेये वेदेऽसंभवात्॥ अस्य चोपदेशस्य
नियोज्यप्रयोजनव्यापारविषयत्वमनुष्ठात्रपेक्षितानुकूलव्यापारगोचरत्वमस्माभिरु
पपादितं न्यायकणिकायां तथा च स्वर्गकामो यजेतेत्यादिषु स्वर्गकामादिसमीहितोपायत
या गम्यन्ते यागादयः कुतस्या तु न साधयितारमनुगच्छेयुः॥ तदुक्तमस्माभिः॥ अस्माध
कं तु तादृश्यादिति॥ अनुष्ठात्रपेक्षितोपायतारहितप्रवर्तनामात्रमपि तु यजेतेत्यादिनामस्मा
धकं कर्मयागादिस्तात्साधयितारं नाधिगच्छेदित्यर्थः॥ न चैते साक्षाद्भावनाभाव्याऽपि
कर्त्रपेक्षितसाधनतानिरुपहितमपीह भावनोद्देश्यभावितुमर्हन्ति येन तेषामनुप्रकार
काः सन्तो नाधिकाराकाङ्क्षो भवेयुः॥ दुःखत्वेन कर्मणां चेतनसमीहानास्पदत्वात्॥ स्वर्गा
दीनां तु भावनापूर्वरूपकामनोपधानाच्च॥ प्रीत्यात्मकत्वाच्च॥ नामपदाभिधेयानामपि
पुरुषविशेषणानामपि भावनोद्देश्यतालक्षणभाव्यत्वप्रतीतेः॥ फलार्थप्रवर्तनाभावना
भाव्यत्वलक्षणेन च यागादिसाध्यत्वेन फलार्थप्रवर्तनाभावनाभाव्यत्वरूपस्य फलस्य सा

वा.त्रि.दि.

२१

ध्यतेस्य सम्प्रधानत्वाभावे नैकवाक्यत्वसमवायसंभवात्॥ भावनान्वयत्वनात्रस्य यागादिना
ध्यते स्वकरणत्वेऽप्यविरोधात् अन्यथा सर्वत्रापि तदुद्देश्यस्य परस्यादेरपि सिद्धिरादिषु तथाभा
वात् फलस्य साक्षाद्भावनाव्याप्यत्वविरहितोऽपि तदुद्देश्यतया सर्वत्र व्यापितया व्यवस्थाना
स्वर्गसाधने यागादौ स्वर्गकामादेरधिकार इति सिद्धं॥ न चाप्राप्तांशविषयाः सांग्रहणा
नेमविधयः दि यागविधयः परिसंख्यायकानि यामकावा भवितुमर्हन्ति॥ न चाधिकाराभावे देहात्मप्र
विलयो वाधिकारि भेदप्रविलयो वा शक्य उपपादयितुमपाततः प्रतिभाने वास्यतत्परत्वमे
व न्याय्यं तत्परत्वे स्वरसतः प्रतीयमानेर्थे वाक्यस्य तात्पर्यं संभवति न संघातायातपरत्व
मुचितं॥ न चैतावता शास्त्रत्वव्याघातः तस्य स्वर्गाद्युपायप्रशंसनेपि शास्त्रत्वोपपत्तेः पुरुषश्रे
योऽभिधायकत्वं हि शास्त्रत्वं सरागवीतरागपुरुषश्रेयोऽभिधायकत्वेन सर्वपारिषदत्वयान
तत्व्याघातः॥ तस्माद्विधिविषयभावो यागमात्रगः स्वर्गस्योत्पादक इति सिद्धं॥ कर्मणो वा
कादित्वस्येति॥ कर्मणो वा तरव्यापारः॥ इति तदुक्तं भवति॥ कर्मणि हि फले प्रतिपत्त्यसाधनत्वस्ये

तंतन्निर्वाहयन्तस्यैवावांतरव्यापारो भवति न च व्यापारवति सत्येव व्यापारो नास्तीति यु
क्तं। अस्फलत्वप्रागेयादिषु तदुत्पत्त्यपूर्वीयं परमापूर्वजनयितव्येतदवांतरव्यापारत्वात्॥
अस्तपापि च तैलपानकर्मणि तेन पूर्वोक्तव्यापारेतत्तैलपारणारम्भेणानांतरवां
तरव्यापारत्वात्॥ तस्मात्कर्मकार्यमपूर्वं कर्मणः फलेवर्तव्ये तदवांतरव्यापारइति युक्तमप
५ दपुनः फलोपजननान्यथानुपपत्त्या किंचित्कल्प्यते तदा फलस्यपूर्वकोभावस्या॥ तद्विचि
त्रस्यकारणस्येति पदीश्वरादेवकेवलादिति शेषः॥ कर्माभिवाशुभाशुभैः कार्ये हेतुत्वा
देरागादिमत्वप्रसंगइत्याशयः॥ पूर्वं तु वारणायपर्णोहेतुव्यपदेशात्॥ दृष्टानुसारिणी हि क
ल्पनायुक्ता नान्यथा। नहि ज्ञानुमत्तिंइदंउदयः कुंभकारायनधिष्ठिताः कुंभाद्या दृष्टायदि
भवंतो दृष्टाः नच विपक्षत्ववनादिभरम्बपतत्पूर्वैर्व्यभिचारस्तेषामपि कल्पनास्पदता
याव्यभिचारनिदर्शनतानुपपत्तेस्तस्माच्चेतनेन कर्मवाऽपूर्वं वा नचेतनानधिष्ठितं स्वात
त्र्येकार्ये प्रवर्त्तितुमुत्सहते॥ नच चेतनत्वमात्रेकर्त्तृस्वरूपमात्रं त्वविनियोगादिविशेषवि

शा॰त्रि॰द्वि॰
२२

तानस्य न्यमुपयुज्यते येन तदुहितं देवतासमाराधितेन सिद्धसाध्यत्वमुद्भाव्येत तस्मात्तत्तत्का
मादाद्दलं गोपुरतोरणप्रभृत्जनानिदर्शनसहस्रैः सुपरिनिष्ठितं यथा चेतनाधिष्ठाना
द्चेतनात्कार्यारम्भ इति। तथा चैतन्यं देवताया आसत्तिबाधकं श्रुतिस्मृतीतिहासपुराण
प्रसिद्धं न शक्यं प्रतिषेद्धुमित्यपि स्पष्टं निरटंकि देवताधिकरणे लौकिकस्त्वाई स्वकोदा
न परिचरणप्रणामाञ्जलिकरणस्तुतिमयीभिरतीश्रद्धागर्भीभिर्भक्तिभिराराधितः
प्रसन्नः स्वानुरूपमाराधकाय फलं प्रयच्छतीति विरोधि तस्मात्प्रक्रियाभिः। विरोधकार्या
हितामित्यपि स्वप्रसिद्धं॥ तदिह केवलं कर्मणा वा पूर्वं वा चेतनानधिष्ठितमचेतनं फले
प्रसूत इति दृष्टविरुद्धं॥ यथा विनैवं कर्मणा न फलं प्रसूत इति कल्प्यते दृष्टविरोधाद् एवमिह
प्रीति॥ तथा देवपूजात्मको यागो देवतां न प्रसादयन्फलं प्रसूत इत्यपि दृष्टविरुद्धं नहि
राजपूजात्मकमाराधनं राजानमप्रसाद्य फलाय कल्प्यते तस्माद्दृष्टानुगुण्याय या
गादिभिरपि देवताप्रसक्तिरुत्पाद्यते तथा च देवताप्रसादाद्देवस्यापि नः फलोत्पत्तेर

पपन्नैः कृतमपूर्वेण एवमप्युभयेनापि कर्मणा देवताविरोधनेऽप्यतिक्रम्यतिसिद्धं ततः स्था
यिनोऽनिष्टफलप्रसवः न च शुभाशुभकारिणां तदनुरूपफलोपसृज्यमानादेवताद्वेष
पक्षपातवतीति युक्तं तेन हि सा ता साधुकारिणमनुगृह्णाति निगृह्णाति पापकारिणं भव
ति हि खेचरको वा तद्वत् लौकिकोऽपीश्वरः॥ यथा च परमार्थपूर्वे कर्त्तव्ये उत्पन्नपूर्वेण संग
पूर्वेणोपयोगः एवं प्रधानाराधनेऽङ्गाराधनानामुत्पन्नस्य प्राधानाराधनानां चोपयोगः॥
स्वाम्याराधन इव तस्मात्तत्प्रणयि तदाराधनानामिति सर्वं समानमन्यत्राभिनि
वेशात्॥ तस्माद् दृष्टविरोधेन देवताराधनात्फलं॥ न च पूर्वा कर्मणो वा केवलान्नाद्धि के
धतः॥ हेतुव्यपदेशाच्च श्रौतः स्मार्त्तश्च व्याख्यातः॥ येषु न चैतदीयाविध्यापारस्तथा प्रत्तोत्तर
नायाः नित्यत्वं सर्वे साधारणत्वमिति मन्यमाना भाष्यकारीयमद्धिकरणं दूषयां बभूवुः
तेभ्यो व्यावहारिकामीमांसाशिष्टव्यविभागाव स्थापयामिति भाष्यं व्याचष्टे इति॥ ॥इति श्री
वाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्यविभागे भामत्यां तृतीयस्याध्यायस्य द्वि
तीयः पादः समाप्तः॥ ॥ ॥॥

वाचस्पतिनतीयाध्यायद्वितीयपादस्समाप्तः